मार्गशीर्षमासः
वर्षम्–६८
द्वितीयोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ दिसम्बर २०१६

ISSN 2249-698X

# भारती

संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

## लोकार्पण समारोह

सोमवार, 28 नवम्बर 2016






## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | कथा पुण्य-पावित्र्य-प्रसन्नतादायिनी | डॉ. हर्षदेवमाधवः | ६ |
| ५ | स्मरणीयाः केचन वैय्याकरणाः | डॉ. सुरेन्द्रकुमारशर्मा | ७ |
| ६ | दशरथद्विवेदिरचितस्य जानकीजीवन........ | डॉ. प्रहलादकुमारशर्मा | ९ |
| ७ | प्रभोः प्रवेशः | जैनमुनि श्रीराजसुन्दर्राविजयः | १० |
| ८ | विद्यावाचस्पतिमधुसूदनाचार्यप्रणीते ....... | डॉ. हेमराज शर्मा ( साहित्याचार्यः ) | ११ |
| ९ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १५ |
| १० | बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १७ |
| ११ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | १७ |
| १२ | सप्तर्षिकाङ्ग्रेसस्य वैशिष्ट्यम् | नरेन्द्रसिंह चौहानः | १८ |
| १३ | श्रेयोमार्गोपदेष्टा व्यासः | डॉ. पुष्पा मलिक | १९ |
| १४ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २१ |
| १५ | संस्कृतसाहित्ये वैयाकरणभर्तृहरेः अभिमते..... | डॉ. सुरचना त्रिवेदी | २३ |
| १६ | अस्माकं शिक्षा-व्यवस्था | डॉ. रचना तिवारी | २५ |
| १७ | भूम्यन्तर्जलम् | श्रीमती मीनाक्षी योगी | २८ |
| १८ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३१ |
| १५ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः



**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामाशर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता

ओ.पी. गोयल

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

शुभ्रैरूर्मिभिरुच्छलद्गतियुता देवापगा मस्तके,
मोलौ यस्य सुशोभते शशिकला वक्षःस्थले व्यालराट्।
उत्सङ्गे च नगाधिराजतनया प्राणप्रिया पार्वती,
व्याघ्रस्याम्बरधारिणं पशुपतिं वन्दामहे तं शिवम्।।

## मासावतरणम्

शीताद्भीतिमुपागताय किरणैः सूर्यः सुखं यच्छति,
कूपस्योष्णजलं सुखाय भवति ब्राह्मे मुहूर्ते सदा।
स्नात्वा तेन जलेन यान्ति विबुधा गोविन्ददेवालयं,
साक्षाद्विष्णुमयः शुभो निगदितः मार्गः स्वयं विष्णुना।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

मार्गशीर्षमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
दिसम्बर, 2016
अङ्कः - 2
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# शिक्षायां गुणवत्ता आवश्यकी

...✍ पं. प्यारेमोहनशर्मा

शिक्षा कीदृशी भवेदिति राजनेतारः शिक्षाशास्त्रिणश्च साम्प्रतं पौनःपुन्येन विचारयन्ति। प्रधानमन्त्रिमहोदया अपि कथयन्ति यद्भारतस्य युवानो ज्ञानविज्ञानक्षेत्रे सर्वेभ्यो देशेभ्यः श्रेष्ठतरा विद्यन्ते। संसारस्य अन्यानि राष्ट्राणि पूर्णरूपेण विकसितानि विज्ञानेन समृद्धानि शस्त्रास्त्रैः सुसज्जितानि संजातानि तत्र सर्वत्र भारतीया युवान एव तत्कार्यं समपीपदन्। अतः स आह्वयति तान् भवन्तो भारते आगच्छन्तु। भारतस्येन्नत्यै नवं विज्ञानं विकासयेयु विकासशीलं भारतं पूर्णरूपेण विकसितं कुर्वन्तु भवन्तः। अत्रेदं विचारणीयं यद् ये भारतीयाः सर्वमिदं सम्पादयन्ति तेषां प्रारम्भिकी शिक्षा कीदृशी कुतश्च भवति किं प्राथमिकशिक्षा कक्षाष्टमपर्यन्तं तथैव प्राप्तवन्तो यादृशी भारतीया नेतारः सम्पादयन्ति? किं वर्णमाला ज्ञानं विना कोऽपि बालको वाक्यं पठितुं शक्नोति? किं ज्ञानं विनैवाग्रिमकक्षायां प्रवेशः समुचितः ? न कोऽप्यष्टमा कक्षापर्यन्तमनुत्तीर्णो भवेत्। यदि अष्टमकक्षापर्यन्तं वर्णमालाज्ञानं विनैव छात्रः सुमुत्तीर्णो जायते तर्हि नवम-कक्षायां किं करिष्यति ? किं तादृशा एव छात्रा नवीनं विज्ञानमन्वेष्टुं सक्षमा भविष्यन्ति?

यदि सर्वकारो महान्तो नेतारश्च विद्यालयेषु छात्रसंख्यावर्धापनाय तादृशमाचरन्ति, तदा तु येऽपि बालका भारते तेषां नामानि विद्यालयपञ्जिकायां लिखन्तु इत्यादेशं प्रसारयेत् यदा कोऽपि निरीक्षकः विद्यालये गच्छेत् तदा तत्र तानि नामानि दृष्ट्वा सन्तुष्टो भविष्यति सहस्त्रवर्षेभ्यो भारते शिक्षां गुरवः प्रयच्छन्ति। नहि केनापि एतादृशः क्षुद्रो विचारः कृतः। अत एव उच्यते एतद्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।

आम् यदि शासकः स्वीयं शासनं यावज्जीवनं कर्तुमभिलषन्ति तदा ते यत् कुर्वन्ति तदेव श्रेष्ठतरम्। यतोहि अशिक्षिता जना न कदापि शासनस्य विरोधं कुर्वन्ति यथा शासका आज्ञापयन्ति तथैव ते मूर्खाः कुर्वन्ति। न हि ते कदापि शासनासनमभिलषन्ति। प्रत्यक्षमुदाहरणं भारते आङ्ग्लानां शासनस्य विद्यते। यदा आङ्ग्लाः भारते समागच्छन् तदा तेषां शासनमसुरक्षित-मेवासीत्। नहि भारतीयास्तेषां शासनं स्वीचक्रुः। तदा तैः सावधनतया विचारः कृतः । कथमस्माकं शासनं सुस्थिरं भवेत्? तदा कारणमन्वेष्टुं केचन आङ्ग्लाः भारतेऽभ्रमन्। तेन प्रयासेन तेऽजानन् यद् यावत् भारतीयाः शिक्षिता भविष्यन्ति तावत् नास्माकं शासनं सुस्थिरं भविष्यति।

ते स्वकीयनिरीक्षणप्रतिवेदनम् आङ्ग्लदेशे सम्राज-मप्रेषयन्। तत्र तेऽलिखन् यद्भारते गेहे गेहे विद्यालयाः सन्ति। तत्र निरन्तरं शिक्षणं प्रचलति। अतो यावदेतत् शिक्षणं नावरुद्धं भविष्यति तावत् अस्माकं शासनमत्र चिरं स्थातुं न शक्नोति। ततः सम्राडाज्ञया भारते प्रचलितान् विद्यालयानाङ्ग्लाः अवरोधयन्। आङ्ग्लभाषाविद्यालयां-श्चास्थापयन्। तदनन्तरमशिक्षितेषु भारतीयेषु ते शतशो वर्षाणि शासनमकार्षुः। अतो वर्तमानशासका अपि प्रदर्शनार्थं विद्यालयान् संचालयन्ति वस्तुतस्तु अशिक्षितेषु चिरं शासनं कर्तुमभिलषन्ति। सर्वेऽपि शिक्षाशास्त्रिण इमां व्यवस्थां न समीचीनां मन्यन्ते।

अतः सर्वकारः शिक्षायां गुणवत्तायै अध्ययनानन्तरं योग्याः स्वविषयप्रतिपादने कुशलाः छात्राः समाजे समागच्छेयुः एतदर्थं स्वकीयनिर्णये पुनः विचारं कुर्यात्। अन्यथा विहार प्रान्तस्य छात्रा इव सर्वेऽपि भारतीयाः छात्रा उच्चतमपरीक्षोत्तरणानन्तरमपि पुस्तकनाम्ना अपि परिचिता नैव भविष्यन्ति नहि किमपि कर्तुं सक्षमा भविष्यन्ति।

## पूर्वसैनिकेभ्यो वनरेङ्क वनपैन्शन

भारतीयाः सैनिकाः पाकिस्तानाधिकृते कश्मीरे रात्रावन्धकारे-अन्तः प्रविश्यातङ्कवादिनां सप्तनिवास-

शिविराणि विनाशयामासुः। विंशति आतङ्किनोऽघ्नन् द्विशतं पृथक्तावादिनो जघ्नुः। भारतीयाः सैनिकाः सम्मानार्हाः। वयं भारतीयसैनिकेभ्यः धन्यवादं यच्छामः। इतः पूर्वमपि नैकवारं भारतीयसैनिकाः पाकिस्ताने समये समये आतङ्कवादमवरोद्धुं सक्षमं प्रहारमकार्षुः।

सम्प्रति वनरैंकवनपेंशनवृत्तिमादाय केन्द्रसर्वकारस्य दृष्टिकोणं स्पष्टं न विद्यते। पूर्वसैनिकाः स्वकीयां वृत्तिं पूरयितुं समये समये दिल्यां विरोध-प्रदर्शनमकुर्वन्। तेन प्रदर्शनेन रक्षामन्त्रालयाधिकारिणः स्वयं रक्षामन्त्री अपि कुपिता अभूवन्। रक्षामन्त्रालयस्य कोपः सर्वथा अनुचितोऽविद्यत। इदं कार्यं परस्परचर्चया पूर्वमेव सारल्येन भवितुं शक्नोति स्म। परन्तु रक्षामन्त्रालयो नाविचारयत्। ततश्च सर्वकारं प्रति वैमनस्यमवर्धत। सम्प्रति रामकिशनग्रेवालनाम्ना पूर्वसैनिकद्वारा आत्महत्या-करणानन्तरं पुलिसजनास्तदीयपरिवारेण सह निन्दनीयं व्यवहारमकार्षुः। एतेन परिस्थितिः कलुषिता जाता। यद्यपि रक्षामन्त्री अवदत् यदेतदर्थं रेड्डीसमितिघटनं कृतमस्ति। परन्तु समितौ पञ्चसदस्या भवेयुः तत्र पूर्वसैनिकाः। आस्यां समितौ त्रयः पूर्वसैनिकाः भवेयुरित्यासीत् कथनम्। परन्तु तथा नैव जातम्। इत्थं परस्परसम्बन्धा दूषिताः संजाताः। रक्षामन्त्रालयः प्रादर्शयत् यत् पूर्वसैनिका लोभिनो विद्यन्ते। अतो वार्तावरुद्धा। सर्वकारं प्रति पूर्वसैनिकानां विरोधस्त-थैवातिष्ठत्। एतेन ओआरपी विषये यत् किमपि कृतं तस्य प्रसन्नतापि सैनिकेषु विलुप्ता जाता। रक्षामन्त्रालयस्य दृष्टिकोणं वर्तमानपरिस्थितिकृते उत्तरदायी वर्तते। एतेन पूर्वसैनिकाः निराशा अभूवन्। अनेनैव कारणेन एकः पूर्वसैनिक आत्महत्यामकरोत्। एनामात्महत्यां व्यक्तिगतं नावबोद्धव्यम्। इदं कार्यं पूर्व- सैनिकानां प्रबलविरोधं प्रदर्शयति। स्वतन्त्रताप्राप्तेरनन्तरं नैके सर्वकाराः समायाताः। सर्वेषां सर्वकाराणां च कार्यकाले कर्मचारिणाम् अधिकारिणाञ्च सांसदानां विधायकानां समये-समये समुचिता वेतनशृंङ्खला वर्धापिता। वेतनान्यवर्धन्त, परन्तु देशरक्षायै ये प्राणानत्यजन् ये च देशरक्षायै सततं स्वकर्तव्यं पालयन्तः सेवानिवृत्ताः संजाताः तेषां वेतनं चिरं नावर्धत। रामकिशनग्रेवाल, पूर्व सैनिकः पेंशनरूपेण यद्धनं प्रतिमासमलभत। शरीरिकरूपेणा- न्यकार्यं कर्तुमसमर्थः संजातः स स्वकीयवेतनवृद्धयै नैकशः सर्वकारम- प्रार्थयत् परन्तु नहि सर्वकारः तमश्रृणोत्। अन्ततोगत्वा निराशः परिवारपालनेऽसमर्थः स आत्महत्यामकरोत्। स मृत्योः पूर्वमेकं पत्रमलिखत्। तत्र तेन लिखितम् अहं सर्वेषां पूर्वसैनिकानां कृते आत्महत्यां करोमि। एतेन स्पष्टं जायते यत् वर्तमानकाले सेवानिवृत्यनन्तरं यत् पेंशनवेतनं वर्तते तेन कोऽपि पूर्वसैनिकः स्वपरिवारपालने न समर्थः। इत्थं तदीयपत्रेण न केवलं पूर्वसैनिकानामपितु सर्वेषां सैनिकानां मनःसु सर्वकारविरोधः समुत्पन्नः। यदि समये समाधानं सर्वकारो न विधास्यति तर्हि देशस्य सुरक्षाव्यवस्था समाप्तप्राया भविष्यति। पुनश्च तस्य आत्महत्यानन्तरं किमिति तदीयाः परिवारजनाः पुलिस-प्रशासनेन पुलिसकार्यालये बलान् नीताः। तत्र तैः सह व्यवहारोऽपि न समीचीनो विहितः। यदि पुलिसप्रशासनं परिवारजनेभ्य आत्महत्याविषये किमपि ज्ञातुं वाञ्छाति स्म तर्हि तदीयगृहं गत्वा परिवारजनान् सान्त्वयित्वा तत् कार्यं विधातव्यमासीत्।

वी.के. सिंहः यः स्वयं सैन्यप्रमुखोऽविद्यत सः सैनिकस्य मानसिकता विकृतेति अकथयत्। तेषां कथनेन प्रकटयति यत् स मनसा विकृतो विक्षिप्तश्च विद्यते। एतादृशी टिप्पणी न विधेया।

यद्यपि सर्वकारेण पूर्वसैनिकानां संप्रति पेंशनवृत्तिः अष्टाविंशतिसहस्त्ररूप्यकाणि विहितानि। वस्तुतः सम्प्रति परिवारं पालयितुमष्टाविंशतिसहस्त्ररूप्यकाणि सन्तोष-प्रदानि विद्यन्ते परन्तु महर्घता दैनन्दिनं वर्धते अतः मासिकीं वृद्धिं वर्धापयितुं विचारः कर्तव्यः। अन्यच्च नेदं केवलं वेतनवृद्धिविषयकमान्दोलनं अपितु पूर्वसैनिकानां प्रतिष्ठाविषयकमपि विद्यते। अतः वार्तालापेन समाधानो विधेयः।

मूरारिबापुसूत्राणि

# कथा पुण्य-पावित्र्य-प्रसन्नतादायिनी

❑ डॉ. हर्षदेवमाधवः

जनाः कथं शृण्वन्ति। तुण्डं तुण्डं मतिर्भिन्ना इति न्यायेन कोऽपि बुद्ध्या, कोऽपि तर्कैः, कोऽपि अवलोकनार्थं, कोऽपि कुतूहलेन कथां शृण्वन्ति। अहं स्वयं मम कथायाः मूल्याङ्कनं करोमि तद् लक्ष्यते यन् मम कथायाः त्रयो हेतवः सन्ति–

**( 1 ) स्वान्तः सुखाय तुलसीरघुनाथगाथा।**
**रामकथा स्वात्मने सुखं ददाति।।**

**( 2 ) मोरे मन प्रबोध जेहिं होई।**
**अर्थात् कथया मनः प्रबुद्धं भवति।।**

**( 3 ) निज वाणी पावनि करन।**
**रामकथया वाणी पवित्रा भवति।।**

अहं नास्मि तुलसीदासः, अहं मोरारिबापुः। अयं मार्गः तुलसीनिर्मितो वर्तते। अहं मम पद्भ्यां मम मनसा चलामि। कथया पवित्रतायां वृद्धिर्भवति। मनः प्रबुद्धं भवेत् वा न वा किन्तु वाणी पवित्रा भवत्येव मम प्रसन्नतायां वृद्धिर्भवति। प्रसन्ने चित्ते परमात्मदर्शनम् इति भगवत्पादानां शङ्कराचार्याणां सूत्रम् अस्ति। अहं पवित्रता+प्रसन्नता= परमात्मा इति मम कथायाः प्राप्तव्यं मन्ये। एतन् मम स्वात्मनो मूल्याङ्कनमस्ति स्वविविक्तं सदैव रक्षणीयम्।

अहं यायावरः। अहं सदैव पर्यटनशीलः। कथाः स्थाने स्थाने प्रचलन्त्येव। कदाचित् वयं कारयाने उपविश्य गच्छामः। कारयानस्य काचं पिधाय गच्छामः तदा काऽपि मक्षिका कारागृहस्था भवति कदाचित् शताधिकविंशतिकिलोमीटरमिति गत्या कारयानं गच्छति तदा मक्षिका अवश्यमेव काचद्वारेण सङ्घटिता भवेत्, किन्तु मक्षिका कदापि न सङ्घट्टिता भवति। सा कारयाने स्वस्थानं अन्वेषयति। कदाचित् आसने कदाचित् स्कन्धे कदाचित् नियंत्रणचक्रे स्वावकाशं रचयति तथैव अहम् अपि कार्यक्रमेषु सुखददुःखदप्रसङ्गेषु द्विविधावसरेषु गच्छामि। तदापि जनसङ्कुले स्थले मम विविक्तिं रक्षामि। अहं सामान्यमपि वृत्तं ध्यानपूर्वकं शृणोमि। प्रतिस्थितिं अहं मम विविक्तिं रक्षामि। एकाग्रतायां एकस्य अग्रता वर्तते विविते स्वध्यानं सुरक्षितं भवति। विविक्ते अहम् अपि एकस्मै अग्रतां ददामि। इदमेकं सत्यं भवेत् प्रेमरूपं भवेत् करूणारूपं वा भवेत्।

**विवेकिगुर्वाश्रयः साधकाभेद्यकवचम्।।**

गुरुविषयकाणि नैकानि दर्शनानि रचितानि सन्ति। गुरुः अनिवार्यः, उपकारकश्च इति सर्वदर्शनानां मतम्। वस्तुतः मनुष्येण स्वयमेव यात्रा कर्तव्या। अतः अन्तकाले भगवता बुद्धेन 'अप्प-दीपो भव' (आत्मदीपो भव) इत्युक्तम्। दीपुस्तु वर्तते किन्तु दीपप्रज्वालनस्य अवश्यमेव आवश्यकता वर्तते। गुरुरेव आत्मज्योतिषः प्रज्वालनं करोति।

गुरुः आत्मदीपं प्रज्वालयति किन्तु संसारवात्याऽऽसाराः तं निर्वापयन्ति तदा गुरुः काचपटलायते। अतः रामायणे कथितमस्ति, 'कवच अभेद विप्र गुरुपूजा।' विवेकप्रधानस्य गुरोः आश्रयः साधकस्य महत् कवचम् अस्ति। पुरोहितः मन्दिरे देवसमक्षं दीपं प्रज्वालयति। तदा देवः दीपे न घृतं पूरयति। यदि दीपः तैलविहीनः भवेत् तदा देवः न किञ्चित् करोति। देवः न दीपशिखामपि समीचीनां करोति। पुरोहितः एतत् सर्वं करोति किन्तु असौ न देवः। यः पुरोहितो भूत्वा दीपान् प्रज्वालयति स गुरुरेवास्ति। अतः गुरुः न प्रभुः किन्तु दीपप्रज्वालकः पुरोहितकल्पः।

8, राजतिलक बंगलोज, बोपल, अहमदाबाद

# स्मरणीयाः केचन वैय्याकरणाः

❑ डॉ. सुरेन्द्रकुमारशर्मा

व्याकरणवेदाङ्गस्याध्ययनपरम्परा पर्याप्तं पुरातनी अस्ति। तैत्तिरीयसंहिताया उल्लेखानुसारमिन्द्रो वाचं व्याकरोत्। ततो निष्पन्नमैन्द्रं व्याकरणम्। तदाद्यमिति व्याकरणशास्त्रेतिहासलेखका ब्रुवन्ति। सम्प्रत्युपलब्धं पाणिनीयं शब्दानुशासनम् अष्टाध्यायी-रूपेण संकलितं तु तदपेक्षया पर्याप्तमर्वाचीनं विद्यते। यद्यपि पाणिनेरनन्तरमपि नूतनव्याकरणसर्जनाय स्वल्पप्रयासा बभूवुः किन्तु पाणिनीयव्याकरणस्य माहात्म्यप्रभया निस्तेजस एव ते नाद्रियन्ते विद्वज्जनैः। पाणिनीयं व्याकरणमेव सर्वेषु व्याकरणेषु सर्वातिशयित्वं भजते। अस्य च पाणिनीयस्य व्याकरणस्य अध्ययनाध्यापनपरम्परा सम्पूर्णभारतवर्षे सुतरां प्राचलत्। ऐतिहासिकोल्लेखानुसारं पाणिनीयव्याकरणस्योद्भव-कालाद-द्यावधि वर्षाणां त्रीणि सहस्राणि व्यतीतानि पुनरपि यथावदमुष्याध्ययनं विधीयते इति महानस्ति गौरवस्य विषयः।

यद्यपि राजस्थाने ईस्वीतृतीयशताब्द्या आरभ्य कातन्त्रव्याकरणस्याध्ययनपरम्पराऽपि प्रचलिताऽ-भवत्। इदं व्याकरणद्वयं एकोनविंशीं शताब्दीं यावत् पाठ्यते स्म। एकोनविंश्यामेव शताब्द्यां राजस्थानस्य राजधान्यां जयपत्तने संस्कृतपाठशालायाः प्रारम्भो विहितोऽत्रत्यै राजभिः श्रीमद्भिः रामसिंहद्वितीयाख्यैः। इमां पाठशालां पुरा सम्राजोजयसिंहप्रथमस्य शासन-कालात् केवलं राजपरिवारस्य कृते एव संचाल्यते स्म। किन्तु सम्राजो रामसिंहद्वितीयस्य कालाद् ब्राह्मणक्षत्रिय-वर्णयोरध्ययनायैवैषा पाठशाला प्रशस्ताऽभवत्। वस्तु-तस्तु तदाप्रभृत्येवात्र राजस्थाने पाणिनीयव्याकरणस्या-ध्ययनाध्यापनपरम्परा प्रारब्धेति विज्ञायते।

राजस्थाने पाणिनीयव्याकरणस्य विद्वद्वरेण्येषु पं. एकनाथ ओझा महोदयानां विशिष्टं स्थानं वक्तुं शक्यते। एते वंशपरम्परातो वैयाकरणत्वात् जयपत्तने सर्वप्रथमं व्याकरणविद्याध्यापनाय नियुक्ताः। अमीषां वैदुष्यं सुप्रथितमासीत्। काशीनाथद्राविडमहोदयास्तु व्याकरणेऽपि स्वारस्यस्य प्रस्तोतारस्तात्कालिकच्छात्राणां कृते व्याकरणसञ्जीवनीमुपस्थापितवन्तः। भट्टमथुरानाथ-शास्त्रिणाऽमुष्य यशोगानम् उदात्तशब्देषु विहितम् -

**''व्याकरणाधानात्पठदन्तेवासिमानसेषु,**
**प्रोद्भासितसंस्कृताग्रयमार्गा ये समर्ह्यन्ते।**
**कविताविमर्शे सानुरागाः शब्दशास्त्रपरा-**
**मर्शे नानुमेनिरे गरिष्ठबुधवर्यन्ते।।**
**मञ्जुनाथव्युत्पत्तेः प्रवेश हेतवस्तेऽभव -**
**न्येषामुपदेशगिरः प्रायो नातिचर्यन्ते।**
**सरलतयैव सुप्रकाशीकृतदेवगिरः -**
**काशीनाथशास्त्रिमहाभागा मुहुः स्मर्यन्ते।।''**

पं. श्री गिरिधरशर्मचतुर्वेदमहोदया विविध-विद्यानिष्णाताः व्याकरणशास्त्रीयपाण्डित्येनाप्यात्मानं प्रख्यापयामासुः। एषां व्याकरणशास्त्रीयं रचनाद्वयं सुप्रथितं वर्तते – 'पुरातनानि व्याकरणानि वैय्याकरणाश्च,' 'ओजिष्ठादिविचारालोचनं' चेति। एवमेव स्मरणीया वर्तन्ते श्रीलक्ष्मीनाथशास्त्रिद्राविडमहोदयाः। भट्टमथुरानाथशास्त्री इमान् 'शब्दशास्त्रशैलीपरि-शोधका' इत्युक्त्वा स्मृतवान्। व्याकरणस्य दुरूहग्रन्था-नामप्यध्यापने भवदीयं पाटवं सुविख्यातमवर्तत। पं. वीरेश्वरशास्त्रिद्राविडमहोदया अपि स्वीयशब्दा-नुशासनवैदुष्येण लोकान् चमत्कृतवन्तः। लघुशब्देन्दु-शेखरस्य श्रीधरीटीकायाः सर्जना तत्रभवद्भिर्विहिता-

याऽद्यापि व्याकरणाध्येतृणां कृते परमोपयोगिनी अस्ति।

अस्यामेव परम्परायाम् उल्लेखनीया: सन्ति श्री सूर्यनारायणशास्त्रिणो व्याकरणाचार्या:। यद्यपि व्याकरणशास्त्रीया ग्रन्थरचना भवद्भि: नैव विहिता किन्तु व्याकारणप्रयोगाणां बोधाय अभिनवव्याकरण-शिक्षणशैली भवद्भि: प्रतिपादिता आसीत् अस्ति च। भवद्विरचित 'संस्कृतशिक्षा' ग्रन्थं दृष्ट्वैव भवदीयं व्याकरणशास्त्रीयं वैदुष्यं विज्ञातं भवति। एवमेव श्रीनारायणभट्ट पर्वणीकरमहोदया अपि विविधशास्त्रीयेण वैदुष्येण विख्याता अभूवन्। व्याकरणशास्त्रीयं रचनाचतुष्टयममीषां प्राप्यते-चतुर्दशसूत्री व्याख्या, श्लोकबद्धा सिद्धान्तकौमुदी, परिभाषा प्रतिच्छवि: शब्दशास्त्रप्रशस्तिश्चेति।

विंशीं शताब्दीं यावद्वैयाकरणानामेषा परम्परा यथा स्वीयेनाजस्रेण स्रोतसा राजस्थानीयाध्येतृणामुपकारं कृतवती तथा नान्येषामन्यत्रेति मे मति:। विंश्या: शताब्द्या अन्तिमचरणेऽपि पं. रामचन्द्रभट्टमहोदया:, पं. गङ्गाधरद्विवेदमहोदया:, स्वामी बालानन्दमहाभागा:, चण्डीप्रसादाचार्या:, सुरजनदासस्वामिन:, पं. श्रीरामचन्द्र जी, दयारामस्वामी, डॉ. गङ्गाधरभट्टमहोदया:, घनश्यामदत्तशास्त्रिण:, रामधारीशास्त्रिणश्च विश्वनाथशर्माण: शब्दशास्त्रीयाध्ययनपरम्परां निर्वोढवन्त:। एषां समेषां वैशिष्ट्यं सर्वे जानन्त्येव। वर्तमानेऽपि इमां परम्परां निर्वहमाणा वर्तन्ते डॉ. श्रीकृष्णशर्माण:, डॉ. अर्कनाथचौधरीणा:, रामकिसा शोरशुक्लमहोदया:, महावीरप्रसादसारस्वता:, पं. श्री अशोकतिवारिमहोदया; डॉ. श्रीधरमिश्रमहोदया: डॉ. राजधरमिश्रमहोदया: अन्ये च। आशासे व्याकरणा-ध्ययनस्येयं शाश्वतिकी परम्परा अनवरतं प्रसृता फलीभूता च भविता।

**प्राचार्य:**

**श्री दादू आचार्यसंस्कृतमहाविद्यालय:, जयपुरम्**

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम....................................पुत्र/पुत्री श्री.............................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी.................................वाया/पोस्ट ऑफिस..........................**

**तहसील................................जिला........................राज्य..........................**

**देश....................पिन........................................दूरभाष............................**

**मोबाईल नं............................ईमेल.....................................................**

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक

**भारती संस्कृत मास पत्रिका**

**बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014**

ई–मेल – sanskritbharti09@gmail.com

# दशरथद्विवेदिरचितस्य जानकीजीवनमहाकाव्यस्य सीताश्रितेतरकाव्यापेक्षया वैशिष्ट्यम्

❑ डॉ. प्रहलादकुमारशर्मा

स्वातन्त्र्योत्तरभारते सीतामाश्रित्य यद्यपि विविधानि काव्यानि रचितानि तथापि दशरथद्विवेदिरचितस्य जानकीजीवनस्य किमपि वैशिष्ट्यं वर्तते। महाकविना अभिराजराजेन्द्रमिश्रेणापि विंशतिसर्गात्मकं जानकी-जीवननाम्नैव महाकाव्यं प्रणीतं, यत्र सीतायाः प्रादुर्भावादारभ्य सम्पूर्णं चरितं वर्णितम्। किन्तु तत्र सर्गस्थश्लोकानामेतत्काव्यापेक्षया संख्या न्यूना वर्तते। अस्मिन् जानकीजीवने प्रतिसर्गं श्लोकसंख्याः विशत्यधिकैकशतं वर्तते, इति महती संख्या पद्यानां वर्तते। अभिराजराजेन्द्रमिश्रेण स्वजानकीजीवने नवीनच्छन्दसां गीतानां च प्रयोगः कृतः। यथा-

**मध्येसभमनुभूय वल्लभाद् दुस्सहमिदमपमानम्।**
**हतहृदया मैथिली लक्ष्मणं सदयमुवाच विधानम्।।**
**आनय काष्ठचयं प्रिय लक्ष्मण!**
**रचय चितां सुस्फीताम्।**
**दयितकदर्थितकलुषशरीरामिह धक्ष्याम्यथ सीताम्।।**
**रामो यदि न स्नेही! श्वसिति मुधा वैदेही।।**
**दशमुखदुरितसहस्रगुणाधिकशूलदचरितकलङ्कः।**
**हतभाग्यां मां व्यथयति**
**वल्लभपरिकल्पितमलपङ्कः।।**
**देहे ताम्यति देही**
**श्वसिति मुधा वैदेही।।**

किन्तु दशरथद्विवेदिना पारम्परिकाणि एव छन्दांसि प्रयुक्तानि।

रेवाप्रसादद्विवेदिप्रभृतिमहाकविभिः प्राणीतानि सीताश्रितानि काव्यानि उत्तरसीताचरितादीनि लघूनि समग्रसीताचरितं नोपस्थापयन्ति। किन्तु प्रस्तुते जानकीजीवनं सीतायाः प्रादुर्भावादारभ्य भूविवरप्रवेश-पर्यन्तं समग्रं वृत्तं वर्णितम्।

यथा श्रीहर्षस्य नैषधीयचरितस्य प्रतिसर्गान्ते कवेः तत् पित्रोः सर्गस्य च नाम लभ्यते यथा प्रकृते जानकीजीवनेऽपि यथा-

**मा प्यारी रघुनाथ आप्तचरितस्तातस्तुगर्गान्वय-**
**स्तेषां वेदसुतेष्वभूद्दशरथस्सूनुस्तृतीयः कृती।**
**सार्वार्यो रघुनाथभामनिरतो श्रीजानकीजीवनं**
**काव्यं चारु चकार पूर्णमभवत्सर्गोऽयमष्टादशः।।**

प्राचां कवीनां भगवतीप्रभृतीनां च विविधाः स्तुतयः श्रीमद्भागवतं स्मारयन्त्यो यथाऽत्र लभ्यन्ते तथा नान्यत्र। एवं नगर-नदी-ऋतु सायं-सूर्योदयचन्द्रोदय-प्रभृतीनां प्रकृतितत्त्वानां यज्ञ- सम्भारस्य च सविस्तरं वर्णनं यथाऽत्र प्राप्यते तथा नान्यत्र। त्रयोदशे सर्गे वर्षाकाले मेघः सीतया प्रेषितो दूतः विरहिणं रामं सीतायाः सन्देशं श्रावयति। अस्मिन् प्रसङ्गे कविना मेघदूतस्य रीतिराश्रिता, भारतस्य विविधस्थलानां वर्णनं चापि कृतम्। अत्र मेघदूतस्य प्रभाव एवं द्रष्टुं शक्यते। यथा-

**ऊचे मेघः प्रकृतिपुरुषौ कामरूपौ किलावां**
**दासोऽयं वै भुवनविदितस्त्वम्मघोनोऽनुजोऽसि।**
**पूर्वे वासो जलधिरुभयोरावयोरेकयोनिः**
**स्मार्यं किञ्चिज्जलधिशयनं त्वं मदीयोऽसि बन्धुः।।**
**संभूतिर्नौ तरणिविहिते तुल्य एवान्ववाये**
**काकुत्स्थानां भुवनविदिते पुष्करावर्तकानाम्।**
**आर्तत्राणं विहितमुभयोः कर्म संवादिरूपे**
**ख्यातौ नाम्ना जगति किमुभौ नो घनश्याम बन्धो।।**
**इत्थं मन्द्रैः प्रणतिवचनैरुन्मुखीकृत्य रामं**

**ध्यायन्मध्ये जनकतनयापाण्डुवद्गण्डपालीम्।**
**रुद्धोत्कण्ठः श्वसनमथितो मूढवज्जातमेघः**
**किञ्चिन्नोचे, चलति विषमे कस्य रुद्धेह वाणी।।**
**भार्याबन्धुं तव प्रियसखं विद्धि मामम्बुवाहं**
**स्नेहात्तस्याः व्यसननिहिता या उपत्वामिहाप्तम्।**
**स्निग्धा सा मे मुखरभगिनी सिन्धुगोत्राभियोगा-**
**दिष्टं सर्वैश्चिरपरिचितं चाभिधत्तेऽभिधेयम्।।**

एतादृशी मेघस्य सीतादूतत्त्वेन कल्पना नान्यत्र सीताश्रितकाव्येषु दृश्यते।

दशरथद्विवेदी रामायणकथापरम्परायां किमपि परिवर्तनं न करोति। सीतायाः पृथिव्याः प्रादुर्भावादारभ्य पुनः तत्रैव प्रवेशं यावत् यथावत् कथां वर्णयति। मध्ये प्रकरणविशेषस्य मेघसन्देशादिरूपस्य कल्पनां करोति इति तु अन्यत्। उत्तरसीताचरिते रेवाप्रसादद्विवेदिना सीतायाः पातालप्रवेशो न वर्णितः, अपितु समाधिना परब्रह्मणि प्रवेशोक्तः। तस्याः पार्थिवं शरीरं पृथिव्यां लीनं भवति। कुटीरे एव समाधिस्था सीता मुक्ता भवति।

जानकीजीवने यादृशं प्रसादगुणस्य साम्राज्यं वर्तते। तदन्यत्र दुर्लभं, समासतो वक्तुं शक्यते यद् आकारमहत्त्वेन प्रसादगुणसाम्राज्येन विविधपारम्परिकच्छन्दसां प्रयोगेण, रसाभिव्यक्तेः सामर्थ्ययोगेन मेघसन्देशादिनवीन-प्रकरणोद्भावनेन वाल्मीकिरामायणकथानुसरणेन विविधप्राचीनकाव्यच्छायाग्रहणेन च स्वातन्त्र्योत्तरभारते रचितेभ्यः सीताश्रितकाव्येभ्यः वैशिष्ट्यं विभर्ति कविवर-दशरथद्विवेदिप्रणीतं जानकीजीवनमहाकाव्यम्।

**अध्यापक-**
राज. वरिष्ठ उपाध्याय संस्कृतविद्यालय, सामोद, जयपुर

# प्रभोः प्रवेशः

❑ जैनमुनि श्रीराजसुन्दरविजयः

**प्रभो !**
**तव मन्दिरे**
**तव प्रवेशः न स्यात्**
**तत्पूर्वम्**
**तव एकोऽपि भक्तः**
**मन्दिरे नैव आगच्छति,**
**तथा**
**यस्मिन् दिने तव प्रवेशः स्यात्**
**तदनन्तरं**
**तव सर्वेऽपि भक्ताः**
**अवश्यमेव आगच्छन्ति।**
**प्रभो !**
**मम हृदये**
**शुभतत्त्वानामागमनं कथं न भवति**
**तद्**
**अद्यैव मया ज्ञातम्।**
**यावत्कालं**
**मम हृदये तव प्रवेशः न स्यात्**
**तावत्कालम्**
**एकस्यापि शुभतत्त्वस्य**
**आगमनं नैव स्याद्,**
**तद्वदेव**
**यदा**
**तव प्रवेशोऽभविष्यत्**
**तदा**
**सकलान्यपि शुभतत्त्वानि**
**स्वथामे आगमिष्यन्नेव।**
**....**
**प्रभो!**
**मम हृदये**
**तव प्रवेशः सुशोधं भवतु।**
**★ ★ ★**

# विद्यावाचस्पतिमधुसूदनाचार्यप्रणीते पथ्यास्वस्तिग्रन्थे अयोगवाहानां समीक्षा

❑ डॉ. हेमराज शर्मा ( साहित्याचार्यः )

अद्य सूचनाप्रौद्योगिकीयुगेऽस्मिन् यत्र वेदानां ज्ञानं प्रति उदासीनता पाश्चात्यविद्वद्भिः समापन्ना तत्रैव मधुसूदनाचार्यस्य विज्ञानालोके भारतीया हि विद्वांसः पुरातनस्य वैदिकज्ञानस्य सहृदयत्वं प्रस्तुतवन्तो वैदिकज्ञानविज्ञानेन अद्यतनानां प्रस्तुतविषयाणां तकनीकिसिद्धान्तानामवगमने न केवलं सारल्यमपितु नितरां नूतनाविष्कारभूतानां तत्त्वानामालोचनं कुर्वन्ति।

आधुनिकोऽपि वैदिकज्ञानसाधको मधुसूदनाचार्यो वैदिकग्रन्थानां वैज्ञानिकरीत्या समीक्षां प्रस्तौति या ह्यस्माभिः पदे पदे वैदिकज्ञानराशावनुभूयते। मधुसूदनेन अनेका रचना वेदज्ञानसम्बद्धा निगमागममहाखण्डयोः प्रस्तुताः सन्ति। तत्र सर्वत्राऽस्माभिर्वेदप्राया एव रचना दरीदृश्यन्ते। यद्यप्यस्माकं पुरातना वेदाचार्या वेदभाष्यकारा निरुक्तकारा वेदांगव्याख्याकारा वेदानां व्याख्यां सम्पादितवन्तोऽथ च सत्स्वपि नैकेषु वेदव्याख्यापरकग्रन्थेषु मधुसूदनाचार्यस्य रचनानां महन्महत्त्वं विलोक्यते यतो हि न केवलं तत्र वेदमन्त्राणां व्याख्यापितु तस्य ग्रन्थेष्वस्माभिर्वैदिकज्ञानस्य विस्तृतरूपतया वैज्ञानिकरीत्या या व्याख्या प्राप्यते सा अद्यतनस्य आधुनिकवातावरणस्य परिप्रेक्ष्ये नितान्तमेव भौतिकरासायनिकजीवविज्ञानान्वेषणाय समुपयुक्तापीति वक्तुं शक्यते।

वेदविद्योद्धारको वेदरहस्यप्रकाशकः समीक्षा-चक्रवर्ती विद्यावाचस्पतिर्मधुसूदनओझा आधुनिक-संस्कृतसाहित्ये देदीप्यमाननक्षत्र इव विराजतेतराम्। वैदिकज्ञानचक्षुः स महान् आचार्यो न केवलं संस्कृतसाहित्यस्यापितु भारतीयसंस्कृतिपोषकस्य सर्वविधवाङ्मयस्याऽमूल्यनिधिर्वर्तते। स एव भारतीयसंस्कृतेः परिपोषकस्य वैदिकज्ञानस्य वैज्ञानिकव्याख्यां प्रतिपादयन् वैदिकज्ञानस्याऽद्यावधि समुपयुक्तं महत्त्वं प्रति सकललोकजीवानां सुतरामेव ध्यानमाकर्षितवान्। मधुसूदनाचार्यः वैदिकग्रन्थानां सम्यगध्ययनं विधाय विलुप्तप्रायस्य वैदिकविज्ञानस्य प्रकाशनाय आजीवनं भागीरथप्रयासं चकार। अद्य तस्य वैदिकज्ञानस्याधारेणैव न केवलं वेदग्रन्थानामध्ययनं पूर्णं जायतेऽपितु तेषां ग्रन्थानां समालोचनं विना वैदिकज्ञानस्य सरहस्यं विज्ञानं कदापि न ज्ञायते। तेन न केवलं वेदव्याख्या प्रस्तुताऽपितु वैदिकग्रन्थानां रहस्यपूर्ण-विषयाणां रहस्योद्घाटनं क्रियते। वेदविज्ञानप्रज्ञानचक्षुः मधुसूदनओझा भारतीयसंस्कृतसाहित्ये सार्धशतादप्य-धिकग्रन्थानां माध्यमेन स्वालौकिकज्ञानेन स्वात्मसूक्ष्म-दृष्ट्या अधिगतविज्ञानेन च सर्वत्र प्रकाशमत्त्वं सम्पादितम्। अस्य ग्रन्था निगम-आगमे महाखण्डद्वये विभक्तास्तत्र निगममहाखण्डे ब्रह्मविज्ञानं यज्ञविज्ञानं पुराणसमीक्षा वेदांगसमीक्षा चेति चत्वारोऽवान्तरखण्डा दृश्यन्ते आगममहाखण्डे च सिद्धान्तागमरहस्यं संहितागमरहस्यं डामरागमरहस्यं यामलागमरहस्यं कल्पागमरहस्यं तन्त्रागमरहस्यं चेति षड् अवान्तरखण्डा वर्तन्ते।

अत्रास्माभिः प्रस्तूयमानमिदं मधुसूदनशर्मप्रणीतं **'पथ्यास्वस्तिः'** इति नामकं पुस्तकं वेदविज्ञानसमीक्ष-णदृशा वाग्विज्ञानस्य विषयप्रस्तुतित्वेन समालोच्यते। प्रस्तुतमिदं पुस्तकं तत्र निगममहाखण्डस्य वेदांग-समीक्षाभागस्य वाक्पदिकाग्रन्थस्य प्रकरणभूते वर्णसमीक्षा इत्यस्यावान्तरग्रन्थत्वेन तिष्ठति पथ्या-स्वस्तिर्नाम।

**'वाग्वै पथ्यास्वस्तिः'** इति श्रुत्वा वागेव पथ्यास्व-स्तिर्नाम्नोच्यते। तत्र स्वरव्यंजनादिविभागेन विभक्ता वाग्

वर्णरूपेति वर्तते। ग्रन्थेऽस्मिन्नपि वर्णानामेव विभिन्न-रूपेण विज्ञानदृष्ट्या समीक्षा प्रस्तुता। अतस्तेषां वर्णानां प्रतिपादकत्वेन वाग्वाचकस्य पथ्यास्वस्तिपदस्य समुपयुक्तता प्रतीयते। अन्यत्र सूर्यं परितः पृथिव्याः परिभ्रमणमार्गोऽपि यो हि दृग्गोचरीभवति सोऽपि वेदभाषासु पथ्यास्वस्तिरिति नाम्ना श्रूयते। एवमाकाशस्थं कान्तिमद्वृत्तमेव पृथिव्याः परिभ्रमणस्य मार्गोऽस्ति तथैव वाचो मार्गस्वरूपा वर्णमातृका। एतेषामेव वर्णानामाधारेण वाक् परिभ्रमति। अतो यथा सूर्यं परितः पृथिव्याः परिभ्रमणमार्गः पथ्यास्वस्तिरुच्यते तथैव वाङ्मार्गस्वरूपा वर्णमातृका अपि पथ्यास्वस्तिरिति नाम्ना व्यवह्रियते।

पथ्यास्वस्तिरिति नाम्नि ग्रन्थेऽस्मिन् पञ्चखण्डा-स्सन्ति मातृकानुवाक्, यमानुवाक्, गुणानुवाक्, अक्षरानुवाक्, सन्ध्यनुवाक् चेति। तत्र मातृकानुवाके-ऽस्मिन् प्रथमे हि खण्डे भाषाया आधारभूततत्त्वानुक्रमे अयोगवाहानां विषये विचाराः प्रस्तूयन्ते। भाषाया यन्मूलं शब्दतत्त्वं तदेव शब्दब्रह्मनाम्ना संस्कृतसाहित्ये प्रवर्ततेतराम्। अथापि न च परब्रह्मज्ञानं जायते शब्दब्रह्मज्ञानं विनेति मुण्डकोपनिषदि सप्रमाणं प्रोच्यते-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**
**शाब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।१**

अतस्तत्र परब्रह्मस्वरूपस्य वर्णसमाम्नायस्य तत्त्व-ज्ञानाय शब्दब्रह्मणो नितान्तं ज्ञानं सर्वप्राधान्यं भवति। वेदभाषाया वर्णमातृकाप्रदर्शनक्रमे तेनैवोच्यते यत्-

**परब्रह्माक्षरं ज्ञातुं शब्दब्रह्माक्षरस्थितिम्।**
**विज्ञापयति विज्ञानप्रवणो मधुसूदनः।। २**

तत्र पाणिनीयशिक्षायामुच्यते अयोगवाहानां परिचयात्मकमध्ययनं यत्- **अयोगवाहा विज्ञेया आश्रयस्थानभागिनः३।** अर्थाद्धि अयोगवाहवर्णा एव आश्रयस्थानभागिन इत्युच्यन्ते। तत्र मधुसूदनाचार्येण स्वीये वैदिकज्ञानाधारितेऽस्मिन् पथ्यास्वस्तिग्रन्थे वर्णसमाम्नायवर्णनसन्दर्भे वर्णानां विवेचनानन्तरम् अयोगवाहानां व्याख्यानं विधीयते। तेषामेवायोगवाहानां व्युत्पत्तिसन्दर्भे तत्त्वबोधिन्यामुच्यते-

**अविद्यमानो योगः प्रत्याहारेषु सम्बन्धो येषां ते अयोगाः, अनुपदिष्टत्वाद् उपदिष्टैरगृहीतत्वाच्च प्रत्याहारसम्बन्धशून्या इत्यर्थः।**

अर्थादेते अयोगवाहवर्णा वर्णसमाम्नायेऽव्यवहृता अथ च व्यवहारे शास्त्राध्ययने च प्रवृत्ता भवन्ति। विषयेऽस्मिन् पतंजलिनाप्युच्यते **महाभाष्ये- यदयुक्ता वहन्ति अनुपदिष्टाश्च श्रूयन्ते४।** तत्र पथ्यास्वस्तिग्रन्थे मधुसूदनेन वैदिकविज्ञानदृशा समीक्षणविचाराणां प्रस्तुतीकरणं विधीयते। वर्णसमाम्नायाः स्थानप्रयत्नसंयो-गैरभिव्यक्ताः तत्राऽनुत्पत्तित्वेन नित्यत्वाच्च। तत्रायोगवाहा भवन्ति- **स्वरभक्तिः रङ्गः, अनुस्वारः, विसर्गः औरस्योष्मा जिह्वामूलीयः उपध्मानीयः यमश्चेति५।**

**१.स्वरभक्तिः-**

तत्र ऋवर्णं लृवर्णं च परितः क्रमपूर्वकौ रेफलकारौ स्वरभक्तिरिति। अत्र हि ऋलृवर्णयोः अर्धमात्रिकौ रेफलकारौ यौ हि ईषत्स्पृष्टप्रयत्नवन्तौ। अतस्तयोरस्पृष्ट-त्वमसम्भवमेव। तत्र याज्ञवल्क्यशिक्षायामपि स्वरभक्त्या विषये उल्लेखोऽस्ति-

**ऋलोर्मध्ये भवत्यर्धमात्रा रेफलकारयोः।**
**तस्मादस्पृष्टता न स्याद् ऋलकारनिरूपणे।।६**

तत्र ऋलृवर्णयोः विद्यमाना स्वरभक्तिः सम्प्रदाय-भेदाच्चतुर्धोच्चारणात्मिका जायते। तत्र केषांचिन्मते अकाराभास इत्युच्चार्यते स्वरभक्तिः तत्र ऋषिरिति रषिवत्, प्राच्यानां मते ऋषिरिति रिषिवदिकाराभासः, उदीच्यां तु ऋषिरिति रुषिवदुकाराभासः एकाराभा इति माध्यन्दिनशाखिनां मते ऋषिरिति रेषिवद्यथा हि कृष्णः, क्रेष्णः, ऋत्वियः, रेत्विय इत्यादिवत्।

अत्र अ, इ, उ, ए इत्येताश्चतस्रोऽर्धमात्रिकाः स्वरभक्तयो भवन्ति यत्र हीकारोकारयोः समानोच्चारणं निषिध्यते। एतेषामुच्चारणमात्रे सम्प्रदायभेदादेव भेदः।

तत्राऽर्धमात्रिकस्योच्चारणं तु भवति परं च लिपिकार्ये अर्धमात्रिकाऽकारादीनां पृथक्लिपिर्नास्ति अतस्तत्र लिपिकार्ये ऋलृ इत्येव लिख्यते। 'र्ह' इत्यपि स्वरभक्तिः तत्र रेफस्य लकारबोधकत्वमपि हकारश्च उष्मवर्णबोधक इति। तस्माद्धि रलाभ्यां परे ऊष्मे वर्णे तन्मध्ये स्वरसदृशा ध्वनिरुत्पद्यते सैव स्वरभक्तिरिति यदुक्तं याज्ञवल्क्य-शिक्षायाम्-

**रलाभ्यां परं उष्माणो यत्र तु स्युः स्वरोदयाः।**
**स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते।**
**स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान्परिवर्जयेत्।**
**इकारं चाप्युकारं च ग्रस्तदोषं तथैव च।७**

अर्थाद् रलाभ्यां परेषु सत्सु उष्मेषु 'शसष' वर्णेषु तेभ्योऽपि परे स्वरे विद्यमानत्वे सति तयोर्मध्येऽर्धमा-त्रिकस्याऽकारस्य सदृशो ध्वनिरुत्पद्यते सा स्वरभक्तिरिति। अस्या उच्चारणं च रेफवर्णेन सह जायते। अर्थाद् उष्मवर्णेभ्यः परे स्वरस्तत्रैव स्वरभक्तेरुच्चारणं भवति न तु व्यंजनपरे।

**२. रङ्गः-**

'देवा एह, महा असीत्यादौ आ इति विशुद्धाकारात् परतः पृथगिव नासिकयोच्चार्यमाणो वर्णो रङ्ग इति। तालुस्थानीयः स्पष्टप्रयत्नीयो मृदु अनुनासिकवर्णो नकारो यत्र हि तालुमृदुस्पृष्टत्वगुणहीनत्वाद् अर्धमात्रिकस्य नकारस्य स्थानेऽर्धमात्रिकाऽनुनासिकविवृत्तिस्वरूपोऽ-कारोऽवशिष्यते। तत्र व्यंजनस्य नकारस्य पूर्वस्वरेणा-ऽनुरंजनात्स्वरवत् प्रतीयते नकारः।'

तस्मात्पूर्वस्वरस्य रंजनेन नकारोऽयं वर्णो रङ्ग इत्युच्यते न चानुस्वार इति तत्रानुस्वारप्रसंगे स्वरस्याऽनुस्वारस्य च अव्यवधानाद्धि पूर्वस्वरोऽ-नुस्वारग्रस्त इव प्रतीयानत्वात्। यथा हि रामं हरिं इत्यादिस्थलेष्वकारेकारयोरनुस्वारेण व्यस्ततया प्रतीतिर्जायते एवमेव रङ्गस्थलेऽपि रङ्गस्य दीर्घस्वरात् पृथगुच्चारणे सति स्वरो हि न तद्ग्रस्त इव प्रतीयते। अत एवायं रङ्गो वर्णोऽनुस्वारात्सर्वथा भिन्न एवेति। उक्तमपि तत्र याज्ञवल्क्यशिक्षायाम्-

**रङ्गवर्णं प्रयुञ्जीरन् नो ग्रसेत् पूर्वमक्षरम्।**
**दीर्घं स्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत्।।८**

**३. अनुस्वारः -**

'अं' इत्यत्र स्वरादूर्ध्वं नासिकयोरुच्चार्यमाणो वर्णोऽनुस्वारः। तस्यानुस्वारस्य नकारवदाभासो भवति। अर्थादयमनुस्वारो नकारवत्प्रतीयत इति परं चायमनुस्वारः सत्यपि प्रतीयमाने नकारवति, नकारात्सर्वथा भिन्न एवेति तत्र नकारस्य मृदुस्पृष्टत्वमथ चानुस्वारस्य ईषत्स्पृष्टमिति भेदापत्तेः। 'शसष' इत्येषां वर्णानां परे सति अनुस्वारस्योच्चारणं त्रैविध्यमाप्नोति। तत्र नकारसदृश-ध्वनिवादिनः सन्ति ऋग्वेदीयाः-

**अलाबुवीणानिर्घोषो दन्तमूल्यः स्वरानुगः।**
**अनुस्वारस्तु कर्तव्यो नित्यं हीः शसषेषु च।।**

सामवेदीया हि विज्ञानिनो मकारवद्ध्वनिं मन्यन्तेऽनुस्वारस्य व्यवहारेऽपि तस्य नाम मकार एव स्वीकुर्वन्ति। यथोक्तं **नारदीयशिक्षायाम्**-

**आपद्यते मकारं रेफोष्मसु प्रत्ययेष्वनुस्वारः।**
**यवलेषु परसवर्णः स्पर्शेषु चोत्तमापत्तिम्।।९**

अर्थाद् र-श-स-ष-हवर्णानां परेऽनुस्वारस्य मकार इति यरलवानां परेऽनुस्वारस्य तस्यैव पंचमवर्ण इति नियमात्प्रतीतिस्तु जायत एव। कुत्रचिच्चाऽध्वर्युवेदीया अनुस्वारस्य ध्वनिं मकारवत्स्वीकुर्वन्ति। कण्ठ्यानु-नासिके सति अनुस्वारस्योच्चारणे ङकाराभासो भवति न तु ङकार एवेति।

**४. विसर्गः -**

'अः' इति विसर्गोऽस्ति। अत्र ह्यकारः स्वरमात्र-बोधकः। स्वरात्परं हकारवत्प्रतीयमानो ध्वनिः हकारभिन्ने सति विसर्जनीयो विसर्गो वेत्युच्यते यथा रामः हरिः इत्यत्र। अत्र प्रतीयमानमात्र एव हकारो न तु साक्षात्तत्र हकारः अर्धस्पृष्टप्रयत्नवान् स्वरभक्तिमान् विसर्गश्च ईषत्स्पृष्टप्रयत्नवान् स्वरभक्तिहीनवान् इत्यापत्तेः। तस्मात् हकारविसर्गयोः पृथक्त्वं हि सिद्धमेव। यथोक्तम्-

**यथा बालस्य सर्वस्य उच्छ्वासो लघुचेतसः।**
**एवमूष्मा प्रयोक्तव्यो हकारं परिवर्जयेत्।। १०**

एवमुच्यते यद्यथा हि लघुचेतसः सर्पस्य उच्छवासो भवति तथैव ध्वनिरत्र कृत्वा हकारस्य परित्याग एव कर्तव्य इति। विसर्गस्य हकारभिन्नत्वमेव पाणिनिनापि कथ्यते–

**ओभावश्च विवृत्तिश्च शसषा रेफ एव च।**
**जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः।।११**

अर्थाद् उष्मणामष्टगतयो भवन्ति–ओभावः विवृत्तिः, श, स, ष, रेफ, जिह्वामूलीयः उपध्मानीयः चेति।

**५. औरस्य उष्मा–**

'ह, ह्व' इति औरस्य उष्मा वर्तते। अत्र हि नकारो मकारणकारयोः रेफश्च यवलानां बोधकः।उक्तमपि –

**हकारं पंचमैर्युक्तमन्तस्थाभिश्च संयुक्तम्।**
**औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्।।१२**

**६. जिह्वामूलीयोपध्मानीयौ–**

'= क = ख' इति कखाभ्यां प्राक् हकारवद्ध्वनिर्जिह्वामूलीयः। अथ च = प = फ इति पफाभ्यां प्राक् हकारसदृशध्वनिरुपध्मानीय इति स्पष्टमेव।

**७. यमाः –**

नासिक्यभिन्नस्पर्शान्नासिक्यस्पर्शे परे मध्यवर्ती पूर्वसदृशो वर्णो यो हि नासिक्याऽनासिक्ययोः भेदं विधायोच्चार्यते स एव यम इति। एते स्पर्शवर्णाः स्थानकरणस्पर्शेनोत्पन्ना भवन्ति। यद्यपि स्पर्शवर्णेभ्यः परं यमवर्णे सति सः स्थानकरणस्पर्शविच्छेदेनोत्पद्यते। तथा च पूर्वस्पर्शवर्णसदृशो भवति। एते यमा न तु विंशतिर्न वा चत्वारो भवन्तीति प्रतिपादयन्नाह कश्चित्–

**जकारौ द्वौ मकारश्च रेफस्तदुपरि स्थितः।**
**अशरीरं यमं विद्यात् संमार्ज्मीति निदर्शनम्।।**

तथा च उच्चते कात्यायनेन–

**अन्तःपदेऽपंचमाः पंचमेषु विच्छेदम्।।**

।। इति।।

**सन्दर्भसूची** – 1. मुण्डकोपनिषद् 2. पथ्यास्वस्तिः 3. पाणिनीयशिक्षा 4. महाभाष्यम् 5. पथ्यास्वस्तिः 6. याज्ञवल्क्यशिक्षा 7. याज्ञवल्क्यशिक्षा 8. याज्ञवल्क्यशिक्षा 9.नारदीयशिक्षा 10. पथ्यास्वस्तिः 11. पाणिनीयशिक्षा 12. पथ्यास्वस्तिः

**वरिष्ठ अध्यापकः ( संस्कृतं ), जयपुरम्**

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारती**

खाता संख्या – **2139101912502**

**IFS Code - CNRB0002139**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# मेघसन्देशसाफल्यसूचकं काव्यम्

कविकुलगुरोः कालिदासस्य कालजयिनी कृतिः ''मेघदूतं'' विश्वसाहित्येऽजरामराऽस्ति यया दूतकाव्यानां सुमहती शृंखलाऽभूत् प्रेरितेति सुविदितम्। खण्डकाव्येन मेघदूतेनानेन प्रेरितान्यनेकानि दूतकाव्यानि गतसहस्राब्दीद्वये प्रकाशितानि, विविधान्यन्यान्यपि काव्यानि मेघदूतेन प्रेरितानि। मेघदूतं विरहिणो यक्षस्योद्गारः। विरहिणस्तस्य विप्रलम्भस्तु कालिदासेन चित्रितः किन्तु संयोगोऽपि तस्य संजातः स्यादेव। तस्य वर्णनं किमिति न क्रियेत? अनयैव प्रेरणया जयपुरीयेण कविवर्येण डा. रामदेवसाहू इत्याख्येन संयोगशृङ्गारवर्णन-परं यत् खण्डकाव्यमेकविंश्यां शताब्द्यां प्राणायि तत् सपद्येव प्रकाशितमस्ति ''यक्षिणी संप्रलम्भ'' शीर्षकेण।

105 मन्द्राक्रान्तासु निबद्धेऽस्मिन् खण्डकाव्ये विप्रलम्भानन्तरं यक्षस्यास्य संयोगः कथं यक्षिण्या सह समजनि, तदनु कथमाभ्यां विलासादिलीला व्यधीयन्त इत्यादि साधु विवृतमस्ति। अत्र संयोगः, संप्रलम्भ-नाम्नाऽभिहितः, तदनुकूलमेव रत्यादिवर्णनमस्मिन् काव्ये दृश्यते पाठकैः। खण्डकाव्यस्यास्य प्रकाशनं जयपुरस्थेन राजगङ्गाचेरिटेबिलट्रस्ट इत्याख्येन संस्कृतसेवा-प्रोत्साहकेन प्रन्यासेन प्रदत्तस्यार्थिकसाहाय्यस्य सौजन्येन संजातम्। ग्रन्थेऽस्मिन् प्रकाशकीयं वक्तव्यं दादूमहाविद्यालयप्रधानाचार्येण डॉ. सुरेन्द्रकुमारशर्मणा लिखितं, भूमिका च विदुष्या डॉ. राजेश्वरीभट्टवर्यया लिखिता हिन्द्यां मुद्रिता, संस्कृते पद्यबद्धं प्रकाशनं कविना डॉ. रामदेवसाहूवर्येण शुभाशासनं च राजस्थानीयेन विदुषा संप्रति काशीहिन्दुविश्वविद्यालये संस्कृत-विद्याधर्मविज्ञानसङ्कायें व्याकरणविभागस्य अभ्यागताचार्येण (विजिटिंग प्रोफेसर नाम्नाऽत्राभिहि-तेन) डॉ. श्रीकृष्णशर्मणा लिखितं प्रारम्भे मुद्रितम्।

नूतनस्यास्य काव्यरचनोन्मेषस्य स्वागतं संस्कृत-समाजे सहर्षं विधास्यते इति सुस्पष्टाऽस्माकमाशा।

**यक्षिणीसम्प्रलम्भः कविः डॉ. रामदेव साहू प्रका.** स्वामी लक्ष्मीरामशोधसंस्थान स्वामी लक्ष्मीरामजी का बाग, मोतीडूंगरी रोड, जयपुर पृ.सं. 104 मू. 150/-.

### नूतना शिक्षापत्रिका

प्रमुखतः शिक्षाशास्त्रीयान् विषयान् विमृशन्त्याः षाण्मासिक्यास्त्रैभाषिक्याः शोधपत्रिकायाः प्रकाशनं जयपुरादारब्धमिति सूचयन्तः प्रमोदामहे। समस्तेऽपि भारते दशाधिकेषु शैक्षणिकपरिसरेषु संस्कृतविद्याशिक्षणं विदधानस्य राष्ट्रियसंस्कृतसंस्थानस्य (मानितविश्व-विद्यालयस्य) विद्वत्परिवारोऽस्याः पत्रिकायाः संरक्षकेषु, पथिप्रदर्शकेषु, प्रबन्धकेषु सम्पादकेषु च प्रामुख्यं वहति। जयपुरीया शिक्षासमितिरेका पत्रिकामिमां प्रकाशयति। अस्याः प्रवेशाङ्कः प्रथमाङ्करूपेण सपद्येव प्रकाशितो यस्मिन् 19 शोधलेखाः संस्कृते, 11 हिन्द्यां द्वौ च आङ्गलभाषायां मुद्रिता। प्रथमोऽयमङ्क इति दृष्ट्या विशिष्टानां संस्कृतविदुषां, कुलपति-प्राचार्यप्रभृतीनां शुभाशिषः शुभाकांक्षाश्चापि प्रारम्भे मुद्रिताः। सामान्यतः सेयं प्रवृत्तिर्गतेष्वेषु दिनेषु संस्कृतसमाजेऽपि परिदृश्यते यत् सत्ताधारिणां राज्यपाल-मुख्यमन्त्रि-मन्त्रिप्रभृतीनां प्रसादनाय तादृशानां शुभाशंसाः साग्रहमभ्यर्थ्यन्ते, ता एव स्मारिकासु पत्रिकासु वा प्रथमतो मुद्र्यन्ते। बहुधा महामण्डलेश्वराणां यतीनां चापि शुभाशिषो मुद्र्यन्ते। तां प्रवृत्तिं परित्यज्यास्यां पत्रिकायां प्रथमाङ्के केवलं शिक्षाधीशानामेव शुभाशंसा मुद्रिता इति विशेषोऽस्यां व्यलोकि। अभिवर्धतामस्याः स्तरः प्रसारः सम्मानश्चेति कामयमाना वर्धापयामः पत्रिकाया अस्याः प्रसारयितॄन्।

**शिक्षास्मृतिः** प्रधानसम्पादकः प्रो.के. रविशंकर मेनोन्, सम्पादकाः डॉ. दिनेशकुमारयादवः डॉ. सुनीलकुमारशर्मा डॉ. परमेशकुमारशर्मा, डॉ. आरतीशर्मा, प्रबन्धसम्पादकः प्रो. चाँदकिरण सलूजा, प्रका. ओमशिक्षा समितिः मातृ आशीष 35, राधाविहारः श्योपुर मोड प्रतापनगर, सांगानेर, जयपुर प्रथमाङ्कः (जनवरी-जून 2016), पृ.सं. 180 (मूल्यं नाऽङ्कितम्)।

## रामचन्द्रशास्त्रिकाव्यसंग्रहः

राजस्थाने गङ्गानगरजनपदीये संगरियानामकोपनगरे लब्धजन्मानः पं. रामचन्द्रशास्त्रिणः (23 अक्टूबर 1901 ई. दिवसे लब्धजन्मानः 19 अक्टूबर 1975 दिवसे च दिवमारूढाः) सुप्रथिता विद्वांसः कवयः, समाज-सेवकाः, जननेतारः संस्कृतभाषोपकारिणश्चाऽऽसन्। एतर्हि संगरियोपनगरे संस्कृतविद्यालयस्य स्थापना-ऽकारि। बीकानेरस्य यशस्विनां नरेशानां "चेम्बर ऑफ प्रिंसेज" संस्थानाध्यक्षाणां विविधबिरुदविभूषितानां सरगंगासिंहजीसाहबबहादुरवर्याणां सौजन्येन परस्ता-दांगलशासनसमयेऽपि बीकानेरे या प्रतिनिधिसभा राजसभानाम्ना ऽस्थाप्यत तस्यां सदस्यत्वं रामचन्द्र-शास्त्रिणा निरूढं, जनप्रतिनिधिरूपेण प्रजाहितमनुष्ठितम्।

एतद्विरचितानि शतशः संस्कृतपद्यानि विविधेषु संस्कृतच्छन्दःसु (शार्दूलविक्रीडितादिवार्णिक-च्छन्दःसु), अन्येषु ब्रजभाषादिषु प्रचलितेष्वपि छन्दःसु (कवित्त-दोहाप्रभृतिवार्णिक-मात्रिकच्छन्दःसु) तदानीं सुप्रथितान्यभूवन्। किञ्चित् सङ्कलनमप्येषां प्राकाश्यत किन्तु गच्छता कालेन तेषां परिचयो वैरल्यमाप। तेषां सुयोग्या पुत्रद्वयी तेषामेव पदाङ्केषु प्रचलन्ती विविधेषूच्चपदेषु शिक्षासेवामकार्षीत्। ज्येष्ठः पुत्रः डॉ. वेदप्रकाशशर्मा आयुर्वेदविद्वानस्ति येन राजकीयायुर्वेद-महाविद्यालये, राष्ट्रीयायुर्वेदसंस्थाने च आचार्य-पदमलङ्कृतं, कनिष्ठः पुत्रः डॉ. विद्यासागरशर्मा राजशास्त्रविद्वानस्ति येन राजकीयमहाविद्यालयेषु आचार्यपदम् उपप्राचार्यपदं च सुशोभितम्।

द्वयोरनयोः प्रयासेन पं. रामचन्द्रशास्त्रिमहोदयानां रचनासङ्कलनद्वयं सपद्येव प्रकाशमाप्तम्। संस्कृतकाव्य-रचनानां संग्रहः "संस्कृतकुसुमस्तबकः" शीर्षकेण, हिन्दीरचनानां संग्रहश्च "कविविलसित" शीर्षकेण द्वयोरनयोः सम्पादकयोः सम्पादने प्रकाशमाप्तः। शास्त्रिवर्याणां कृतित्वमुपलक्ष्य तेषां राज्यप्रतिनिधि-सभायां यानि भाषणान्यभूवन् ये परामर्शाश्चाभूवन् तेषां समुच्चयं कृत्वा प्रकाशं प्रापितस्तृतीयोऽपि ग्रन्थः सपद्येव प्रकाशं प्रापत्। ग्रन्थत्रयस्यास्य लोकार्पणं विजयदशमीपर्वणि जयपुरे समायोजिते समारोहे एकस्मिन् व्यधीयत।

संस्कृतकुसुमस्तबके समये समये प्रणीताः सर्वविधाः काव्यरचनाः संगृहीताः सन्ति। एतासु स्तुतयोऽपि सन्ति, प्रशस्तयोऽपि, श्रद्धाञ्जलयोऽपि, हारबन्ध, खड्गबन्ध चापबन्धप्रभृतीनि चित्रकाव्यान्यपि। पूर्वसूचितानुसारं पद्यानि संस्कृतच्छन्दःस्वपि निबद्धानि सन्ति, घनाक्षरी प्रभृतिव्रजभाषाच्छन्दः स्वपि, गीतयोऽपि सन्ति कतिपयेषां हिन्द्यनुवादोऽपि मुद्रितः। प्रारम्भे विभिन्नानां विदुषां शुभाकांक्षाः, पं. रामचन्द्रशास्त्रिणां परिचायका लेखाः। विभिन्नैः विद्वाद्भिर्यथावसरं विलिखिताः। अन्यविधा अपि सम्बद्धा सामग्री सम्पादकद्वयेन सङ्कलिताऽस्ति।

सङ्कलनमिदं विद्वद्वर्यस्य पं. रामचन्द्रशास्त्रिणः सारस्वतयात्रायाः परिचयं साधु प्रस्तौतीति सुतरामभिनन्दनीयौ द्वावपि सम्पादकौ।

**संस्कृतकुसुमस्तबकः** (कवि पं. रामचन्द्रशास्त्री) सम्पादकौ डॉ. वेदप्रकाशशर्मा डॉ. विद्यासागरशर्मा च प्रका. पं. रामचन्द्रशास्त्री स्मृतिजनमङ्गलप्रन्यासः, शास्त्रिसदन ए-88-89 सुभाषनगर शापिंग सेन्टर, जयपुर पृ.सं. 130 मू. 150/-.

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- त्रयोविंशः प्रसङ्गः

# देहल्यां संघकार्यस्य प्रारम्भः

❑ वेणीमाधव गो. धर्माधिकारी

देहलीतः श्रीवसन्तराव ओकमहोदयाः वर्णयन्ति-अहं पञ्चमकक्षायां पठितुं लाचणग्रामाद् नागपुरे समागत आसम्। वार्तेयं 1926 वर्षस्य प्रारम्भकालीनास्ति। तदा मम वयः एकादशवर्षात्मकमासीत्। अस्यां किशोरावस्थायामेव श्री बाबामहोदयैर्नागपुरे मिलनमभवत्। तस्मिन् समये ते षड्विंशति-सप्तविंशतिवर्षवयस्कास्तरुणा आसन्। बीमाकार्यालये कार्यं कुर्वन्तिस्म सीतावडीक्षेत्रे बूधीचालभवने निवसन्तिस्म। प्रतिरविवासरे तेषां निवासस्थाने तरुणकिशोराणां विद्यार्थिनां विचारगोष्ठी भवतिस्म। अहमपि तस्मिन् मण्डले संमिलितोऽभवम्। श्री आप्टेमहोदयानां निवासे तस्मिन्नेव 12X10 क्षेत्रफले कक्षे तस्यां गोष्ठ्यां राष्ट्रभक्तेश्चर्चा भवति स्म। अस्यां चर्चायां श्रद्धानन्ददैनिक-समाचारपत्रस्थलेखानां पाठः भवतिस्म। क्रान्तिकारिणां जीवन्यः श्राव्यन्तेस्म। स्वातन्त्र्यवीराणां सावरकरमहा-भागानां कवेर्गोविन्दाग्रजस्य व राष्ट्रभक्तिपूरितानां कवितानां गानं भवतिस्मत्रे श्रीखुदीरामबोससममहाभागानां मदनलाल-धींगरासदृशानां प्रख्यातानां क्रान्तिकारिणां नामानि तेषां कार्याणां च ज्ञानं मह्यं विद्यार्थिमण्डले एव प्राप्तम्। अनेनैव माध्यमेनाहं राष्ट्रीय स्वयंसेवकसंघशाखास्वपि गतः।

एवं च आप्टेमहोदयाः सर्वप्रकारेण मार्गदर्शकाः आसन्। वयं तेषां गृहे न केवलं बौद्धिकचर्चास्वेव सम्मिलितुमेकत्रिता अभूम अपितु तेषु दिवसेषु ते स्वहस्ताभ्यामेव भोजनं पाचयन्तिस्म। तेषां भोजनस्य स प्रसादोऽस्मानपि मिलतिस्म। एतदतिरिक्तं तेषां गृहे एकोन्योऽपि शब्ददन्तव्यायामप्रयोगो भवतिस्म। अस्मिन् दन्तव्यायामे भर्जितांश्चणकान् मटरान् भूमुद्गांश्च चर्वयित्वा-भक्षणे आनन्दस्समायातिस्म।

इस्वीय 1930 वर्षे देशस्वातन्त्र्यार्थं जङ्गलसत्याग्रहे परमपूजनीया डाक्टरमहोदयाः सम्मिलिता अभवन्। तेषां जेलयात्रा-समये बाबामहोदया एव संघकार्यव्यवस्थां कुर्वन्तिस्म। संघस्वयंसेवकत्वाद् वयं तेषां तेजस्वि दिनचर्या मत्पश्याम। तेषां निस्स्वार्थपरिश्रमशीलतायाः सततोत्साहस्य संगठन कौशलस्य निष्ठायाश्चास्मास्वपि स्वाभाविकः परिणामो भवतिस्म।

1934 वर्षेऽहं संघकार्यार्थं प्रचारकपदे नियोजितः। 1935 वर्षे नागपुरक्षेत्रीयः प्रवासः श्री बाबामहोदयैस्सह कर्तुमवसरः सम्प्राप्तः। ततश्च पुनः 1936 वर्षे नवम्बरमासे देहल्यां संघकार्यं प्रारब्धुमहं प्रेषितस्तदाहमाप्टेमहोदयैः साकमेव देहल्यां समागतः। एवमभूद्यद् 1935 वर्षे पुण्यनगरे हिन्दुमहासभाया अखिलभारतवर्षीयाधिवेशनावसरे हिन्दु-महासभायास्तत्कालीनैर्महामंत्रिभिः पद्मराजमहोदयैः सह डाक्टरमहोदयानां वार्ता समभवत्। तदनुसारमेव तैः दिल्लीं सम्प्राप्य डाक्टरमहोदयार्थं पत्रं प्रेषितमासीत्। पत्रे संदिष्टमासीद् यदि संघकार्यं कर्तुं कश्चित्कार्यकर्त्ता देहल्यामागच्छेत्तदा ते तस्य सम्यग् व्यवस्थां साहाय्यं च करिष्यन्ति। एतदनुसारमेवाहमाप्टेमहोदयैः साकं देहल्यां समागतः।

(क्रमशः) ब्रह्मपुरी, जयपुर

---

प्रेरकप्रसङ्गशतकम् पंचचत्वारिंशः प्रसङ्गः

# हनुमतः श्रेष्ठा प्रकृतिः

❑ मा. श्रीमती आराधना धर्माधिकारी

हनुमतो या श्रेष्ठतमा प्रकृतिरासीत्सा कृतज्ञतैवासीत्। अद्यतनीयायां भाषायां धन्यवादः थैंक्यू, प्लीजशब्दैरयं भावः प्रकटीकर्तुं शक्यः। हनुमानस्मिन् गुरुः। तं प्रति यदि कश्चित् किमप्युपकरोति सः आभारप्रदर्शनं न विस्मरति। सीतान्वेषणानन्तरं लङ्कादहनानन्तरंच यदा स परावृत्यागतः, तदा सर्वेभ्यो वानरेभ्यः अवदत्-चलत प्रसन्नताप्रदमेतं समाचारं प्रभुचरणे निवेदयामः। अस्मिन्नैकाकिनो मे योग-दानमपितु भवतां सर्वेषामेव योगदानं सम्मिलितमस्ति। अद्य यद्यहं सफलस्तर्हि भवतां सर्वेषामेव योगदानेनैव सफलः।

एवमेवास्मास्वपि यदि कश्चित् सफली भवति न स एकाकी। तत्र बहूनां सहयोगः, तस्य मातुः, पितुः, भ्रातृ-भगिन्यादीनां वयस्यानां किमन्यत् निन्दकानामपि सहयोगो भवत्येव। निन्दकेभ्य उत्तेजनया कार्ये गतिर्मिलति सर्वेऽपि धन्यवादार्हाः। धन्यवादप्रदानं नैव विस्मरणीयम्। इयमेव कृतज्ञता। ब्रह्मपुरी, जयपुर

# सप्तर्षिकाङ्ग्रेसस्य वैशिष्ट्यम्

❑ नरेन्द्रसिंह चौहानः

सप्तर्षिकाङ्ग्रेसं एकः समवकारः वर्तते। सहित्यदर्पणे विश्वनाथेन समवकारस्य लक्षणं एवं प्रस्तुतम्-

**वृत्तं समवकारे तु ख्यातं देवासुराश्रयम्**
**सन्धयो निर्विमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे।।**
**सन्धी द्वावन्त्ययोस्तद्वदेक एको भवेत्पुनः।**
**नायका द्वादशोदात्ताः प्रख्याता देवमानवाः।।**
**फलं पृथक्पृथक्तेषां वीरमुख्योऽखिलो रसः।**
**वृत्तयो मन्दकैशिक्यो नात्र बिन्दुप्रवेशकौ।।**
**वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश।**
**गायत्र्युष्णिङ्गमुखान्यत्र च्छन्दांसि विविधानि च।।**
**त्रिशृङ्गारस्त्रिकपटः कार्यश्चायं त्रिविद्रवः।**
**वस्तु द्वादशनालीभिर्निष्पाद्यं प्रथमाङ्कगम्।।**
**द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके।**

तत्र-

**धर्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः।।**
**स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः।**
**अचेतनैश्चेतनैश्च चेतनाचेतनै कृतः।।१**

तत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः। अर्थलाभार्थ-कल्पितोऽर्थशृङ्गारप्रहसनशृङ्गारः कामशृङ्गारः। तत्र कामशृङ्गारः प्रथमाङ्कः एव। अन्ययोस्तु न नियम इत्याहुः। चेतनाचेतना गजादयः।यथा- समुद्रमन्थनम्।

समवकारस्य लक्षणमभिहितम्। सप्तर्षिकांग्रेसस्य वैशिष्ट्यं प्रतिपाद्यते। सप्तर्षिकांग्रेसस्य कथा ख्याता। एषा १९७७ तमे ख्रिष्टाब्दे इन्दिराकांग्रेसस्य पराजयं भारतीय-जनतादलस्य विजयं चाश्रयति। समवकारस्य कथा देवासुरा-श्रया। सप्तर्षिकांग्रेसस्यापि सा तथा मन्तुं शक्यते। दैवसम्पदा-श्रया देवा आसुरसम्पदाश्रया असुरा इति वक्तुं शक्यते। श्रीमद्भगवद्गीतायां दैवी आसुरी च सम्पदेवं वर्णिता।

**''अभयं सत्त्वसंशुद्धि ............''इत्यादि।**

इहासुरीं सम्पदमाश्रित इन्दिराकांग्रेसस्तदनुयायिनश्च संजयप्रभृतयः असुरशब्देन व्यपदेष्टुं शक्यन्ते। एवं जयप्रकाशनारायण-मुरारजीदेसाई-अटलबिहारीवाजपेयि-राजनारायणप्रभृतयस्तु देवशब्देन। देवोऽसुरो वा वस्तुतो न कश्चिद्, अपितु स्वभावविशेष एव सः। यत्र यदा यो दैव्याः सम्पद आवेशः स तदा देवो, यदा तत्रासुर्याः सम्पद आवेशस्तदा असुर इति वक्तुं शक्यते। एवं सप्तर्षिकांग्रेसस्य कथा देवासुराश्रया वक्तुं शक्यते। सम्पूर्णैषा सुन्दरकजानु-काभ्यां सूच्यते।

यद्यपि 'त्रयोऽङ्काः' इति वचनेन त्रिभिरेवाङ्कैर्भाव्यं समवकारे, तथापीह दशाङ्का इति महानाटकवत् महासमवकारत्वमपि सप्तर्षिकांग्रेसस्य वक्तुं शक्यम्। अङ्कसंख्यानिर्धारणमुपलक्षणत्वेनापि व्याख्यातुं शक्यते।

सप्तर्षिकांग्रेसे वीरो रसो मुख्यः। इन्द्रिराकांग्रेसदल-मालम्बनत्वेन तत्कृतनिरंकुशप्रशासनमुद्दीपनत्वेन, भारतीय-जनतादलम् आश्रयत्वेन च वर्णितम्। मोरारजीदेसाई-बहुगुणा-जयप्रकाशनारायण-अटलविहारिवाजपेयि-जगजीवनरामप्रभृतयो नायका अत्र सन्ति यैः प्रधानमन्त्रि-प्रभृतिपदरूपपृथक्पृथक्फलानि लभ्यन्ते। इन्दिरागान्धि-बरुवा-संजयगान्धिप्रभृतयः प्रतिनायकाः सन्ति।

निरंकुशप्रशासनस्य च्युतिस्तद्द्वारा प्रजाहितरूपधर्म-स्थापना च फलम्।उक्तम्-

**''याते जवाहरे स्वर्गं याते लालबहादुरे।**
**गोसृणां हन्त पारुष्यैः काङ्ग्रेसः शासनाच्च्युतः।।**
**(१/१६)**
**प्रशासनं प्रकृतिहितेषु जागृयात्**
**प्रजाजनो निजमनुशास्तु संयतः।**
**समर्च्यतां पुरुषहृदि स्थितो विराट्**
**स पूरुषः परिगतराष्ट्रभक्तिभिः।।'' (१०/४९)**

सप्तर्षिकांग्रेसस्तु सनातनकवे रेवाप्रसादद्विवेदिनोऽनुपमा नूतनेतिवृत्ता दशाङ्का सालङ्कारकाव्यनाट्यशास्त्रतत्त्व-चमत्कारादिगद्यपद्या रमणीया समवकाररूपा कृतिः।

**शोधच्छात्रः**
राष्ट्रियसंस्कृतसंस्थानं, जयपुरपरिसरः

# श्रेयोमार्गोपदेष्टा व्यासः

❑ डॉ. पुष्पा मलिक

**जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः।**
**यस्यास्यकमलगलितं वाङ्मयममृतं जगत् पिबति।।**

वसिष्ठस्य प्रपौत्रः, ऋषिशक्तेः पौत्रः, पराशरस्य पुत्रः शुकदेवस्य च पिता व्यासः द्वैपायनः, कृष्णद्वैपायनः, बादरायणप्रभृतिनामभिः प्रसिद्धो बभूव। अनेन वेदानां विभाजनं कृतम्। अतः वेदव्यास इत्याख्येन ख्यातः-

**वेदं विव्यास यस्मात्तु तस्माद् व्यास इति स्मृतः।**

द्रष्टा, युगद्रष्टा, विलक्षणप्रतिभासम्पन्नेन महर्षिवेद-व्यासेन अष्टादशपुराणानि महाभारतं वेदान्तसूत्राणि च रचितानि। महाभारतसदृशं विशालकायं विविधविषयाणां प्रतिपादकं ग्रन्थं दृष्ट्वा सर्वे एव श्रद्धावनताः भवन्ति, यथोक्तमस्मिन् श्लोके -

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वाचित्।।**

शास्त्रेषु द्वौ मार्गौ निर्दिष्टौ श्रेयोमार्गः प्रेयोमार्गश्चेति। एतयोः श्रेयोमार्गः श्रेष्ठः यतो हि प्रेयोमार्गस्यानुसर्त्ता लौकिकं भोगयुक्तं जीवनं यापयन् परमलक्ष्यमोक्षाच्च्युतो भवति, येन जीवने परमा शान्तिर्न प्राप्यते। एतद्विपरीतं श्रेयोमार्गस्वीकरणेन मोक्षस्यावाप्तिर्भवति। यथाह कठोपनिषदि-

**अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे पुरुषं सिनीतः।**
**तयोः श्रेय आददानस्य साधु**
**भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते।।**

**( द्वितीयवल्ली-1 )**

एवं स्पष्टमेव यत् श्रेयोमार्गस्यानुकरणं लोककल्याण-करं वर्तते। अस्य मार्गस्योपदेष्टा भगवान् वेदव्यासः। तेन स्वविपुलवाङ्मयेन लोककल्याणस्य यः पन्थाः मानवानां कृते निरूपितः, सोऽनुपालनीयः सर्वदा। तेन लोकहितायैव वेदव्यसनं कृतं यथोक्तं विष्णुपुराणे स्वयं भगवता व्यासेन-

**वीर्यं तेजो बलं चाल्पं मनुष्याणामवेक्ष्य च।**
**हिताय सर्वभूतानां वेदभेदान् करोति सः।।**

धर्मार्थकाममोक्षेषु मोक्ष एव परमपुरुषार्थ इति वेदान्तसिद्धान्तः प्रसिद्धः दार्शनिकसम्प्रदायेषु। वेदस्मृतिप्रभृतिषु ग्रन्थेषु अयमेव 'श्रेयस्' इति शब्देनाभिहितः। कैवल्य-निर्वाण-अपवर्गादयोऽस्यैव पर्यायशब्दाः। जीवस्य द्वे प्रबले प्रवृत्ती स्तः - जिजीविषा मुमुक्षा च। संसारस्य सर्वाणि कार्याणि उच्चावचाः प्रयत्नाश्च जिजीविषाया एव परिणाम भूतानि। तेभ्यः मुक्तेः इच्छा जन्ममृत्योः बन्धनेभ्यः मुक्तिं प्राप्य ब्रह्मलीनतायाः इच्छा मुमुक्षा इति नाम्ना ज्ञायते।

श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वणः भागो वर्तते। इयं मोक्षप्राप्तेः सर्वोत्कृष्टा श्रेयोमार्गप्रदर्शिका विद्यते। एतदनुसारेण रागद्वेषयोः उत्पन्नः द्वन्द्व एव अज्ञानमोहौ स्तः। यदा जीवोऽस्माद् द्वन्द्वाद् विमुक्तो भवति, तदा सः मोक्षं प्राप्नोति। गीतायां ज्ञानकर्मभक्ति-योगानां वर्णनं कृतम्। अस्यां कर्मयोग: ज्ञानयोग-भक्तियोगयुक्ती वर्तते। गीतायां योगस्य द्वे व्याख्ये कृते- 'समत्वं योग उच्यते', 'योगः कर्मसु कौशलम्।' समत्वयोगे योगः रागात्मकम् आत्मानं परिष्कृत्य तं परमात्मना युनक्ति योगोऽयम् आध्यात्मिकः योगः मनसः स्थैर्यं विकारशून्यत्वं चास्ति। इदं वैचारिकं मानसिकञ्च समत्वं वर्तते। 'योगः कर्मसु कौशलम्' एतद् योगस्य व्यावहारिकः पक्षः। अनेन जीवः भौतिकं लक्ष्यं प्रत्येकस्मिन् समभावेन स्थितं परमात्मानं समं पश्यन् आत्मना आत्मानं न नाशयति, सः परमां गतिमवाप्नोति -

**समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम्।**
**न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्।।**

महाभारतस्य शान्तिपर्वणि भीष्मपितामहसदृशः धर्मचेता अस्मिन् विषये विस्तरेण चिन्तयति। सः युधिष्ठिरं मोक्षतत्त्वस्य मूलतत्त्वं निर्दिशति। श्रेयसः अधिकारी कः? इत्यस्मिन् विषये तेनोच्यते–

**विमुक्तदोषः समलोष्टकाञ्चनः**
**स मुच्यते दुःखसुखार्थसिद्धये।**

भीष्मेण मोक्षसाधनाय ज्ञानस्यापि महत्ता स्वीकृता। यथा ज्ञानी कामक्रोधलोभमोहादीन् तीर्त्वा परमां गतिं प्राप्नोति, एवमेव योगेन श्रेयसः प्राप्त्यै उपायाः कथिताः। 'पदे परमे स्थिताः' कथयित्वा तदेव सङ्केतितं तेन।

भीष्मपितामहेन मोक्षसम्बन्धे स्वविचारान् प्रतिपाद्य सर्वेषां पर्यवसानं भगवद्भक्त्यां कृतम्। श्रेयसः यानि धर्मसम्मतानि शास्त्रसम्मतानि च चिन्तनानि वर्तन्ते, तानि सर्वाणि भगवद्भक्त्या अपि प्राप्तुं शक्यन्ते। इदमत्र अवधेयं यत् '**सत्यं ज्ञानमनन्तं ब्रह्म, नेह नानाऽस्ति किञ्चन**' इत्यादिश्रुतिप्रतिपादितं पन्थानं परिपोषयन्तो भगवत्पादाः शङ्कराचार्याः यद्यपि भक्तेः साधनत्वमेव स्वीकुर्वन्ति साध्यत्वं ज्ञानस्यैव, यथा '**भक्तिर्ज्ञानाय कल्पते**' इति तथापि व्यवहारे ज्ञानमार्गमुद्धरन्तः ते स्वकीयस्य जीवनस्य अन्तिमे काले लिखन्ति–

**भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते।**

अग्रे तैर्कथितम्–

**पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्।**
**इह संसारे बहु दुस्तारे कृपयाऽपारे पाहि मुरारे।।**

श्री मद्भागवतपुराणस्य नवधा भक्तिः प्रसिद्धा अस्ति–

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।**

भगवतः विष्णोः भक्तिः श्रेयसः प्रदायिका। महर्षिणा पराशरेण स्वयमेव प्रोक्तं यत् यो भगवन्तं विष्णुं स्मरति, तस्य पापराशिः भस्मसाद् भवति। सः मोक्षपदं लभते–

**विष्णुसंस्मरणात् क्षीणसमस्तक्लेशसञ्चयः।**
**मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते।।**

एवञ्च

**सर्वेषां मङ्गलं भूयात् सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।**

इत्यस्य लोककल्याणस्य कामनाम् उद्घोषयति गरुडपुराणे 'हरिः' नाम्नः उच्चारणं श्रेयसः साधनरूपं मतम्–

**सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्।**
**बद्धः परिकरस्तेन मोक्षाय गमनं प्रति।**

श्रीमद्भगवद्गीतायां द्वादशेऽध्याये भक्तियोगं श्रेयोमार्गस्य साधनरूपे निरूपयन् भगवान् कृष्णः अर्जुनं कथयति–

**ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।**
**अनन्येनैव योगेन मां ध्यायन्त उपासते।।**
**तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।**
**भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्।।**

विवेकचूडामणिग्रन्थेऽपि निगदितं यत् श्रेयसः कारणरूप सामग्रीषु भक्तिरेवातिरिच्यते–

**मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी।**

इत्थमेव भगवता वेदव्यासेन अन्यत्रापि श्रेयोमार्गस्य प्रतिपादनं कृतं यत् लोककल्याणहेतवे विद्यते। वस्तुतोऽस्मिन् जगतीतले तत्समः श्रेयोमार्गोपदेष्टा नास्ति नापि भविष्यति। सत्यमेव उक्तम्–

**श्रेयोमार्गोपदेष्टा तु लोककल्याणहेतवे।**
**व्यासं विहाय कः शक्तः दृश्यते जगतीतले।।**

एसो. प्रो./अध्यक्ष-संस्कृत-विभागः
भ. आर्यकन्या स्ना. महाविद्यालयः,
लखीमपुर-खीरी, (उ.प्र.)

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### संस्कृतभारतीविशिष्टिः

या सदा जीविता पुष्पिता पूजिता,
मस्तके रक्षिता वर्धिताऽहर्निशम्।
आंग्लम्लेच्छादिभिर्या न सन्तर्जिता,
हा कथं भारते भारती आहता।। ३१३।।

या हि शास्त्रे पुराणेश्रुतौ संश्रिता,
प्राणवद् भारते पोषिता शुद्धिदा।
भारतीयैः सदा या नवीनीकृता,
हा कथं भारते भारती आहता।। ३१४।।

या हि सर्वत्र देशे विदेशे स्तुता,
भारते सर्वभाषास्थिता भाषिता।
देववाणीपदालङ्कृता झंकृता,
हा कथं भारते भारती आहता।। ३१५।।

भारतैक्ये सदा या हि सञ्जीविका,
पाणिनिमण्डिता या शुभा सम्वदा।
सारयुक्ता पुरा चाधुना शारदा,
हा कथं भारते भारती आहता।। ३१६।।

या रसैरन्विता संस्कृते रक्षिका,
यत्र नाना विदेशागता मज्जिताः।
सर्ववृत्तं मदीयं पुरातोऽधुना,
हा कथं भारते भारती आहता।। ३१७।।

एकतावाहिनी भारते भासुराऽ-
शेषबोधप्रदा काव्यशास्त्रेण या।
नाटकैः सुन्दरैः या मनोरञ्जिका,
हा कथं भारते भारती आहता।। ३१८।।

संस्कृते यत्र सीता सती सद्भुवि,
सच्चरित्रैः सदा सर्वशिक्षाप्रदा।
याज्ञवल्क्यैकलव्यादिभिश्शोभिता,
हा कथं भारते भारती आहता।। ३१९।।

या हि पत्नीसमा सर्वसौख्यप्रदा,
नात्र हिंसा कदापि समुज्जृम्भिता।
मित्रनीतिसमा या हि संहर्षिका,
हा कथं भारते भारती आहता।। ३२०।।

सत्यता सर्ववाचि शुभा राजतां,
भाजनं सद्गुणैः सर्वदा पूर्यताम्।
शिक्षिकेव प्रभा या इदं शिक्षति,
आहता हा कथं भारते भारती। ३२१।।

या सुधास्यन्दिनी मातृवत्सर्वतः,
मन्त्रिवन्मंत्रणासम्प्रदाने रता।
राजवद्राजनीत्या समुल्लासिता,
हा कथं भारते भारती आहता।। ३२२।।

### संस्कृतभारतीवेदना

क्रन्दमाना इयं योषिता हि स्थिता,
या पुरा राजभाषायमाना शुभा।
वल्लभं चान्तरा याबला भाषिता,
हा कथं भारते भारती आहता।। ३२३।।

मार्गयन्ती प्रियं प्रीणयन्तं हृदा,
बान्धवञ्चापि हार्दं सुसंरक्षकम्।
पालकं जन्मदातारमेषा मुदा,
हा कथं भारते भारती आहता।। ३२४।।

द्रौपदी सभ्यमध्ये तथा तर्जिता,
रावणैर्या हृता जानकी-वाद्य सा।
पीडिता प्रेक्षते नित्यमुद्धारकं,
आहता भारते भारती हा कथम्।। ३२५।।

वल्लभां धर्मजायां विहायापरा-
मामृशन्तोऽनुयान्तोऽद्य वैदेशिकीम्।
आंग्लिकां पुत्रिकां चापि हिन्दीं नु हा,
हा कथं भारते भारती आहता।। ३२६।।

वैद्यकीं ज्योतिषीं चाद्य पौराणिकी-
मर्जयन्तोऽपि विद्यां हि पौराणिकीम्।
आश्रयन्तस्त्वदर्थे न वेलाकला,
हा कथं भारते भारती आहता।। ३१३।।

**व्याख्याता (संस्कृतम्)**
**राजकीयकल्याणमहाविद्यालयः, सीकरम्**

# कीदृशी विचित्रता...

❑ **जैन मुनि श्री राजसुन्दरविजयः**

**प्रभो !**
**कोदृशी विचित्रता...।**
**अस्माकं विश्वे**
**याचका दानवीरं धनं याचन्ते।**
**दानवीरोऽपि**
**याचकमुखं संपश्य**
**स्वमुखं वक्रीकरोति।**
**अपशब्दानपि उच्चैर्निगदति।**
**कथं याचकः स्वस्माद् दूरं गच्छेद्**
**इत्येव विचिन्तयति।**
**याचकोऽपि**
**यावद् दानं न दद्याद् दानवीरः**
**तावन्मया**
**अत्रैव स्थातव्यम्,**
**अतोऽन्यत्र नैव गन्तव्यम्**
**इति चिन्तयति।**

**प्रभो !**
**तव मन्दिरे तु**
**अस्माद् विरुद्धमेव निरीक्ष्यते।**
**त्वं परमोदारः**
**दानार्थं सदा सन्नद्ध एव**
**मत्सदृशयाचकमुखं संपश्यापि**
**प्रसन्नवदन एव,**
**न कदाऽपि अपशब्दोच्चारकः,**
**न च मद्गमनचिन्ताचितया विदग्धः,**
**तथापि**
**मत्सदृशयाचकस्य**
**त्वत्सदृशपरमोदारदातारमुपलभ्यापि**
**त्वत्पावनदानस्वीकारस्य**
**नास्ति उत्सुकता।**
**प्रभो!**
**कीदृशी विचित्रता...।**

# संस्कृतसाहित्ये वैयाकरणभर्तृहरेः अभिमते धर्माधर्मविषये प्रमाणविवेचनम्

❑ डॉ. सुरचना त्रिवेदी

संस्कृतभाषा 'प्राचीनभारतीया आर्यभाषा इत्युच्यते।' भारतवर्षस्येयं प्राचीनतमा भाषा अस्ति। इयं देववाणी देवभाषा वेति कथ्यते। वेदाविर्भावानन्तरमियं भाषा वैदिकभाषा रूपेण प्रचलिता। पुनः ऋषिभिः सरलीकृता संस्कृता च संस्कृतसंज्ञामवाप। पूर्वमेव बहुभिः ऋषिभिराधुनिकैर्मनीषिभिश्च सप्रमाणं साधितं यत् वैदिकभाषैव विश्वभाषाणां जननी आसीत् वैदिकभाषात एव संस्कृतभाषायाः विकासो जातः। वाल्मीकीय-रामायणस्य रचनाकालात् लौकिकसंस्कृतभाषायाः कालः आरभ्यते वाल्मीकीयरामायणे संस्कृतभाषायाः कृते मानुषी संस्कृता इति शब्दप्रयोगदर्शनात् तथाहि-

**अहं त्वह्यतितनुश्चैव वानरश्च विशेषतः।**
**वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्।**
**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतम्।**
**रावणं मन्यमाना मां सीता भीता भविष्यति।।**

इह संसारे प्रवृत्तानां सर्वासामपि विद्यानाम्मूलं परमेश्वरोपदिष्टो वेद एवेति न तिरोहितं विदुषाम्। भगवता मनुना अपि वेदानां सर्वज्ञानमयत्वमङ्गीकृतम्। तथा उक्तमपि मनुस्मृतौ-

**यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।**
**सः सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।**
**शब्दः स्पर्शश्च रूपश्च रसो गन्धश्च पञ्चमः।**
**वेदादेव प्रसूयन्ते प्रसूतिगुणकर्मतः।।**

आचार्येण भर्तृहरिणा महाभाष्यस्य सूक्ष्मदृष्ट्या आलोडनं विधाय स्वगुरुणा वसुरातेनोपदिष्टं व्याकरण-माश्रित्य 'वाक्यपदीयनाम्ना' व्याकरणशास्त्रस्य सम्बद्धोऽतिमहत्त्वपूर्णो दार्शनिको ग्रन्थः प्रणीतः। ग्रन्थोऽयं त्रिषु काण्डेषु विभक्तः आगमकाण्डम्-(ब्रह्मकाण्ड) पदकाण्डम् प्रकीर्णकाण्डञ्चेति। वाक्यपदीयग्रन्थस्य प्रणेता आचार्यो भर्तृहरिरित्यत्र नास्ति मनागपि संशीतिलेशः। तथाप्यनेकशः कारिका भर्तृहरिप्रणीता न सन्ति। भर्तृहरिणा प्रकरणानुरोधेन प्राचीनानामाचार्याणामनेकाः कारिकाः यत्र तत्र संगृहीताः।

धर्माधर्मनिर्णये महापुरुषाणां कपिलकणादादीनां तर्कानुमानयोरसामर्थ्यं विद्यते इति समर्थयति वाक्यपदीयकारः। कुशलैरनुमातृभिः यत्नेनानुमितो-ऽप्यर्थोऽन्यैरभियुक्ततरैः अन्यथैवापपद्यत इत्यन्वयः।

कुशलैर्विद्वद्भिः कपिलादिभिरनुमातृभिर्यत्नेनानुमिते-ऽप्यर्थे जगतः कारणं प्रधानमित्येवं विधः अन्यैः अभियुक्तैः कणदादिभिः अन्यथैव परमाणुः जगत्कारण-मित्येवंरूपेण उपपाद्यते साध्यत इत्यर्थः। अतो धर्माधर्म-निर्णयविषये आगमेनैव नूनं ज्ञातुं शक्यते। यथा सत्यमुक्तं केनचित् **''न चागमादृते धर्मस्तर्केण व्यवतिष्ठते।''**

यतोहि यत्नेन विवेचिता अपि अर्था आगमानपेक्षा पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अव्यवस्थिता भवन्तीति नागमगम्येऽर्थे धर्माधर्मविषये केवलेन तर्केण प्रत्यव-स्थातव्यम्। तदेवोक्तं वादरायणमहाभागैः- तर्काप्रतिष्ठा-नादित्यादि एवम् अनुमानम् इव उपमानप्रत्यक्षयोरपि आर्षज्ञानम् आगमं वापेक्ष्य सामर्थ्यं सिध्यति। एतत्सर्वं भर्तृहरिणा वाक्यपदीये अन्याभिः कारिकाभिः प्रतिपादितम्। यथा-

**न चागमादृते धर्मस्तर्केण व्यवतिष्ठते।**
**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्।।**

वाक्यपदीयमिति ग्रन्थावलोकनेन ज्ञायते यद्-भर्तृहरिणा प्रत्यक्षानुमानशब्दाभ्यासाऽदृष्टेति पंच-प्रमाणानि स्वीकृतानि। तत्र प्रत्यक्षप्रमाणं हि द्विविधम्-लौकिकमलौकिकं च।

तत्र लौकिकप्रत्यक्षन्त्वस्माकमस्ति, परं महर्षीणां प्रत्यक्षमिन्द्रियसाहाय्येन विनैव भवतीति तदार्षमलौकिकं प्रत्यक्षं वेत्यवगन्तव्यम्। तच्च लौकिकं प्रत्यक्षं लौकिकैः पुरुषैरत्यन्तं स्वीक्रियते, ऋषिषु स्वाधिकप्रामाण्य-प्रकर्षात्। यथा लोकः स्वमुखमप-श्यन्नपि स्वच्छदर्पणे प्रतिबिम्बरूपेण पश्यत्येवम् ऋषयस्तपसा विशुद्धेऽन्तः करणे लौकिकपुरुषैरग्राह्यमपि वस्तु पश्यन्ति, तच्च ज्ञानं योगजप्रत्यक्षजन्यमिति भावः। अपि च येषां पदार्थानां प्रत्यक्षं लौकिकैर्न कर्तुं शक्यते, त एव पदार्था योगिभिर्महर्षिभिः समाधौ योगबलेनावलो-किताः। यथोक्तं वाक्यपदीये-

**अतीन्द्रियानसंवेद्यान्पश्यन्त्यार्षेण चक्षुषा।**
**ये भावान् वचनं तेषां नानुमानेन बाध्यते।।**

एवं प्रत्यक्षातिरिक्तस्यानुमानप्रमाणस्य सिध्यर्थं युक्त्यादिकन्तु वाक्यपदीये नोपलभ्यते, किन्तु तत्खण्डनमपि न कृतमिति। अत एव **'अप्रतिषिद्धं ह्यनुमतं भवतीति न्यायेन'** वेदमूलकस्यानुमानस्य अर्थावगतौ हेतुत्वावर्णनेनानुमानप्रमाणमप्यनुमतं ग्रन्थ-कारस्येति विज्ञायते। आगमप्रमाणंहि विशेषतः स्वीकृतं वाक्यपदीयकारेण। यतोहि शब्दब्रह्मणो निरूपणमेवास्य ग्रन्थस्य मुख्यो विषयः। अपि चाभ्यासाख्यज्ञानं लौकिकप्रत्यक्षानुमानाभ्यां भिन्नं लौकिकसमाधिजन्यं चास्ति। अतोऽन्यत् प्रमाणम्। यथा-

**परेषामसमाख्येयमभ्यासादेव जायते।**
**मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकाम्।।**

अपि च वाक्यपदीयस्याधोलिखितायां कारिका-यामदृष्टप्रमाणमपि हरिणा स्वीकृतम्-

**प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः।**
**पितृरक्षः पिशाचानां कर्मजा एव सिद्धयः।।**

एवं पंचप्रमाणानि वाक्यपदीयकृता स्वीकृतानि। अन्येषामुपमानार्थापत्यनुपलब्धिसम्भवैतिह्यादीनां प्रमाणानां चर्चाऽत्र न विहितेति तदननुमतान्येव वाक्यपदीयकारस्येति न मन्तव्यम्। यतोहि सर्ववेद-पारिषदं हीदं शास्त्रमितिआर्षोक्त्या यानि प्रमाणानि दार्शनिकैरङ्गीकृतानि, तानि सर्वाण्येवानुमतानि ग्रन्थकारस्येति विचारः स्वीकर्तव्यः इति।

**असि.प्रो. संस्कृत-विभागः**
भगवानदीन आर्य कन्या स्ना. महाविद्यालयः,
लखीमपुर-खीरी (उ.प्र.)

# अस्माकं शिक्षा-व्यवस्था

❑ डॉ. रचना तिवारी

प्रस्तुतेऽस्मिन् शीर्षके शब्दद्वयं त्रयं वा कल्पयितुं शक्यते। प्रथमतः ''अस्माकम्'', द्वितीयः ''शिक्षा-व्यवस्था'' च अथवा द्वितीयस्यापि भागद्वयं कृत्वा ''शिक्षा'' तथा ''व्यवस्था'' इति व्याख्यातुं शक्यते। यतोहि ''शिक्षा'' वस्तुतः स्वतन्त्र विषयः विद्यते। पुनश्च तत्सम्बन्धिनी या व्यवस्था, सा च पृथक्तया व्याख्यातुं शक्यते।

वर्तमानयुगे मया स्वीकृतोऽयं विषयोऽपि न सामान्यः। एवं तु श्रवणे तथा प्रतीयते यत् अयं विषयः अनेकशः चर्चितः श्रुतश्च। पुनरपि न केवलं भारतदेशसन्दर्भेऽपितु सम्पूर्ण जगतः सन्दर्भेऽपि विषयोऽयं स्वीयं विशिष्टं स्थानं धत्ते। अत एव शीर्षकेऽस्मिन् प्रयुक्तः ''अस्माकं'' शब्दः वैश्विकदृष्ट्या प्रयुक्तोऽस्ति।

अत्र एतत् अवश्यमेव विचारणीयं यत् शिक्षादृष्ट्या भारतदेशोऽयं प्राचीनकाले ''जगद्गुरु'' स्थानात् अत्र शिक्षां प्राप्तुं जनाः आगच्छन्ति स्म। अत्र या शिक्षा वैदिककालात् आरभ्य दीयते स्म। सा न केवलं पुस्तकीया, अपितु आध्यात्मिकदृष्ट्या चारित्रिकदृष्ट्या चापि महत्त्वपूर्णा आसीत्। ''अस्माकं'' इति शब्दप्रयोगेण शिक्षा सर्वजनस्पर्शिनी आसीत् इत्यपि भावः विद्यते। शिक्षां प्राप्तुं सर्वेषामधिकारः आसीत् इत्यस्यैव कृष्ण-सुदामा, सत्यकामजाबालि इत्युदाहरणानि सन्ति। न केवलं महिलाः पुरुषाश्च सर्वे समानरूपेण शिक्षां प्राप्नुवन्ति स्म। गुरूणां सविधे सर्वे समानरूपेण शिक्षां प्राप्तुं गुरुकुलं प्रविशन्ति स्म। गुरवोऽपि विना भेदभावं सर्वेभ्यः शिक्षां प्रददति स्म। एतस्याः प्रक्रियायाः कारणादेव गुरवः सर्वेषां कृते आदरभूताः सम्माननीयाश्च भवन्ति स्म। ''शिक्षा सर्वेषां कृते'' इत्यस्मात् कारणादेव प्रस्तुतेऽस्मिन् लेखे ''अस्माकम्'' इति औचित्यपूर्णशब्दः स्वीकृतः अस्ति।

पुनश्च ''शिक्षा'' इति शब्दः सम्प्रति तु अत्यन्तं सुप्रसिद्धः। परञ्च ''शिक्षा'' शब्दस्य श्रवणमात्रेणैव मनसि जिज्ञासेयम् उत्पन्ना भवति यत् ''शिक्षा'' शब्दोऽयं कथम् उत्पन्नः? का च अस्य व्युत्पत्तिः? कश्च अस्य अर्थः? प्राचीनकाले च अस्याः स्वरूपं किम्? वर्तमाने च अस्याः स्वरूपं किम्? इत्येषां सर्वेषां प्रश्नानाम् उत्तरं प्राप्तुं प्रयत्नं कुर्मः।

सर्वप्रथमं ''शिक्षा'' इति शब्दः ''शिक्ष्'' धातुतः भावार्थे ''टाप्'' प्रत्ययसंयोगेन निर्मितो विद्यते। कोषानुसारं ''शिक्ष्'' धातुस्तु शिक्षणार्थे, अध्ययनार्थे, ज्ञानार्जनार्थे च प्रयुक्तोऽस्ति। एतदनुसारमेव ''शिक्षा'' शब्दस्यार्थोऽपि अधिगमः अध्ययनं, ज्ञानाभिग्रहणं, किमपि कार्यं कर्तुं योग्यता सम्पादनस्य इच्छा, कस्मिन् अपि विषये निष्णातो भवितुम् इच्छा, प्रशिक्षणञ्चापि विद्यते। अत एव वेदाङ्गेषु अपि ''शिक्षा'' इति महत्त्वपूर्णाङ्गत्वेन स्वीकृतमस्ति। न केवलम् एतावदेव अपितु ''शिक्षा'' शब्दस्य उल्लिखितार्थानां व्याख्यां कर्तुं बोधनाय वा शिक्षाग्रन्थाः लिखिताः।

इदानीं वयं ''शिक्षा'' शब्दस्य उल्लिखितार्थान् स्वीकृत्य प्राचीनकालस्य भारतीयशिक्षाविषये विचारं कुर्मः। पुरा शिक्षापद्धतिः तादृशी आसीत् यत् नगरक्षेत्रेभ्यः दूरं शान्तक्षेत्रेषु गुरुकुलेषु आश्रमेषु च शिक्षा दीयते स्म। निर्धारितायुंषि एव विद्यार्थिनः गुरुकुलं प्रविशन्ति स्म। प्रारम्भिकी शिक्षा परिवाररूपिविद्यालये एव दीयते स्म परिवारस्य सर्वैः सदस्यैः। संयुक्तपरिवारपरम्पराकारणात् शिशूनां कृते सर्वविधसुविधा उपलब्धा आसीत्। प्रत्यक्ष-अप्रत्यक्षविधिना ज्ञात-अज्ञातपद्धतिभिश्च शिक्षणकार्यं निरन्तरं भवति स्म। न केवलम् एतादवदेव अपितु ज्येष्ठानां व्यवहारादीन् दृष्ट्वापि स्वत एव शिक्षणं प्राप्तं भवति स्म।

पुनश्च यदा निर्धारित-आयुः संप्राप्य गुरुकुलेषु प्रवेशः भवति स्म तदा तत्रापि गुरवः गुरुमातरश्च स्वपुत्राणाम् इव विद्यार्थिनां संरक्षणं संवर्धनञ्च कुर्वन्ति स्म। न केवलं सैद्धान्तिकी शिक्षा दीयते स्म अपितु प्राप्तशिक्षायाः प्रायोगिकरूपमपि गुरवः शिक्षयन्ति स्म। पुनश्च शिक्षा अपि न केवलम् एकस्य विषयस्य अपितु सर्वेषां विषयाणां तत्र समावेशो भवति स्म। अत एव तत्रत्याः विद्यार्थिनः शिक्षां सम्प्राप्य प्रशासनकर्मणि, कृषिकर्मणि, विज्ञानक्षेत्रे, अनुसंधानक्षेत्रे, अस्त्र-शस्त्रनिर्माणे, अन्तरिक्ष (खगोल) क्षेत्रे, भूगर्भ विज्ञानक्षेत्रे किं वा अधिकं-किमपि क्षेत्रम् अवशिष्टं नासीत्।

एतदपि अत्र अस्माभिः चिन्तनीयं यत् सर्वविध-शिक्षणव्यवस्था तु आसीत्, किन्तु विद्यार्थिभिः स्वीयेच्छानुसारमेव विषयाणां चयनं क्रियते स्म। स्वरुचेरनुसारं स्वीकृतविषयकारणात् विद्यार्थिभिः तस्मिन् शिक्षणक्षेत्रे आधिक्येन साफल्यं प्राप्यते स्म। गुरवोऽपि सर्वविषयपारङ्गताः सन्तः अपि नूतन विधासु सर्वदा अन्वेषणतत्पराः आसन्। संस्कृतभाषायाः यद् वैशिष्ट्यमस्ति अल्पाक्षरेषु अपि महद्ज्ञानम्। एतस्मात् एव कारणात् ग्रन्थानां सङ्ख्या तावती न आसीत्। परञ्च ये ग्रन्थाः लिखिताः आसन्, ते गुरुभिः सम्यक् समीक्ष्य प्रयुज्य च। साफल्येन परिणामतः यद् ज्ञानं प्राप्तं भवति स्म, तदेव ग्रन्थेषु निबद्धं क्रियते स्म। अत एव ज्ञानं साधना च द्वयमपि तत्र समाविष्टं भवति स्म। गुरुकुलेषु एव प्राप्तज्ञानस्य बलेनैव (समस्या-समाधानपुरस्सरं) विद्यार्थिनः न केवलं व्यक्तिगतजीवने अपितु सामाजिकक्षेत्रेषु अपि सफलाः भवन्ति स्म। सम्पूर्णशिक्षा चतुर्दश विद्यासु समाहिताः आसीत्।

अत्र अंशोऽयमपि अस्माभिः ध्यातव्यः यत् सम्पूर्ण-प्राचीनशिक्षाव्यवस्था विना धनम् अर्थात् निःशुल्करूपेण प्रकल्पिता आसीत्। अहो! कीदृशी परम्परा? शिक्षा चिकित्सा चेते द्वेऽपि विना धनम्। इत्यक्ते एतयोः द्वयोः उपरि सर्वेषामधिकारः आसीत्। निर्धनः भवेत् अथवा धनिकः, प्रतिष्ठितः भवेत् अथवा सामान्यः, स्त्री भवेत् अथवा पुरुषः-विना भेदभावं शिक्षाव्यवस्था सर्वेषां कृते समानरूपेण दीयते स्म।

उल्लिखितं सर्वमपि यदा विचारयामः तदा निश्चयेन अस्माकम् अवधानं तान् ग्रन्थान् प्रति गच्छति, ये मूलतः संस्कृतभाषायां निबद्धाः सन्ति। अत्र किञ्चित् चर्चां यदि संस्कृतभाषायाः विषये कुर्मः तर्हि अप्रासङ्गिकी न भविष्यति।

वस्तुतः संस्कृतभाषा न केवलं भाषामात्रम् अपितु भारतस्य आत्मा एव विद्यते। यथा शरीरे विद्यमानः आत्मा दृष्टिगोचरः न भवति, परन्तु सम्पूर्णशरीरं स एव संचालयति। तथैव इयं संस्कृतभाषा भारतस्य आत्मा आसीत्, अस्ति स्थास्यति च। एतस्य प्रत्यक्षम् उदाहरणमेतदेव यत् संस्कृतभाषायाः श्रवणमात्रेणैव कश्चिदपि भारतीयः जनः सगौरवम् एतदेव वदति - एतत्तु संस्कृतमस्ति (आप संस्कृत बोल रहें है।)। अर्थात् इदानीमपि सर्वेषु भारतीयेषु संस्कृतरूपी आत्मा विद्यमानः अस्ति रक्तकणेषु संस्कृतं प्रवहति च। अतः यावच्चशीघ्रम् इयं भाषा प्रसृता सशक्ता च भविष्यति तावच्शीघ्रममेव अस्मासु सत्त्वस्य जागरणं भविष्यति तथा वयं मूलस्वरूपं प्राप्तुं शक्नुमः। सम्प्रति तु एतदपि प्रमाणितं यत् ये संस्कृतं सम्यक्तया पठन्ति, ते अन्यभाषा अपि अन्येषाम् अपेक्षया शीघ्रतया अवगन्तुं वक्तुञ्च शक्नुवन्ति। एतस्य प्रात्यक्षिकं सर्वत्र द्रष्टुं ज्ञातुं च शक्यते। अतः एतं विषयम् अहमत्र केवलमेतत् उक्त्वा समापयामि यत् भारतं ज्ञातुं संस्कृतम् अस्माभिः पठितव्यम् अवगन्तव्यञ्च।

एवं प्रकारेण प्राचीन शिक्षायाः विषये मीमांसाशब्दैः एतदेव वक्तुं शक्यते यत् शिक्षाप्राप्तेःपश्चात् देशं समाजं च स्वकीयं मत्वा नैतिकता-चारित्रिकबलेन च विद्यार्थिनः सर्वविधविकासं कर्त्तुं देशस्य समाजस्य च संरक्षणं संवर्धनं च कर्त्तुं संलग्नाः तत्पराश्च भवन्ति स्म।

इदानीं वयं वर्तमानकालिकीं शिक्षामपि विचारयामः। एतत्तु सत्यं यत् समयः परिवर्त्तनशीलः विद्यते। अत एव सामान्यतया कोऽपि वक्तुं शक्नोति सम्प्रति तु भिन्नः समयः अस्ति अर्थात् अब समय बदल गया। किन्तु अस्माभिः अत्र विचारणीयं यत् समयपरिवर्त्तनेन किम् अस्माकं देशः परिवर्त्तितः? किं सूर्यः परिवर्तितः? किं चन्द्रः परिवर्त्तितः? किं वा वायुः परिवर्त्तितः? किं वा जलम् अग्निश्च परिवर्तितौ?

मम विचारेण तु केवलम् अस्माकं चिन्तनं परिवर्तितम्। पुनश्च चिन्तन परिवर्त्तनस्य कारणमस्ति अस्माकं शिक्षापद्धतिः परिवर्त्तनम्। यत् मया पूर्वम् उक्तं यत् अस्माकं शिक्षायाः आत्मा आसीत् अस्ति च संस्कृतं, तस्य एव तिरस्कारः कृतः? बहिष्कारः कृतः? किम् आत्मा-शून्यो भूत्वा अपि कश्चित् जीवति? एतत् महत् आश्चर्यं यत् एतस्यां स्थितौ अपि संस्कृतं वयं स्मरामः। यदा-कदा चर्चां कुर्मः। संस्कृतग्रन्थानां नामानि वदामः। संगोष्ठीषु विचार-विमर्शं कुर्मः। देशे विदेशेषु भााषणप्रसङ्गे संस्कृतग्रन्थानाम् उदाहरणं प्रस्तुमः। किं वा अधिकं-संस्कृतरत्नानि विहाय किं विद्यते अस्मिन् भारतदेशे? पुनरपि ''माता कुमाता न भवति'' इत्यनुसारं वयं संस्कृतं त्यक्तवन्तः, संस्कृतेन वयं न त्यक्ताः।

कदाचित् संस्कृतेन वयं त्यक्ता: स्याम तदा न जाने अस्माकं का गति: स्यात्?

सम्प्रति शिक्षणसंस्थानेषु यत् शिक्षणं प्रशिक्षणं वा दीयते, एतेन अस्माकं विद्यार्थिभि: महता धनव्ययेनापि केवलं स्मरणीया: कतिपया: सामान्यविषय बिन्दव: प्राप्यन्ते। यस्याम् अवस्थायां शिशव: परिवारेषु निवासं कृत्वा राम-कृष्ण इव स्वतन्त्ररूपेण विचरन्त: परिवारजनेभ्य: मनोरञ्जनं कुर्वन्ति स्म आनन्दं च यच्छन्ति स्म, सम्प्रति तस्याम् अवस्थाम् अथवा एतस्याम् उक्तौ अतिशयोक्ति: न भविष्यति यत् जन्मकालादेव शिशव: मातृपितृभ्यां दूरं धनलोलुपै: उद्घाटितशिक्षणसंस्थानरूपिकारागृहेषु प्रेष्यन्ते तत्र च प्रताड्यन्ते। निबद्धा: प्रताडिताश्च भूत्वा शिशूनां प्रारम्भत: एव मानसिकता भिन्ना भवति। सैव मानसिकता अनन्तरकालेषु पितरो: कृते कष्टदायिका भवति।

पुनश्च सम्प्रति सर्वकारस्य रीति-नीतिकारणात् शिक्षणसंस्थानानि व्यवसायकेन्द्राणि सञ्जातानि। सामान्य-जनानां बालकानां बालिकानां च उच्चसंस्थानेषु धनाभावे प्रवेश एव दुर्लभ:। अन्यत्र उपेक्षिता एव सर्वकारीय संस्थानेषु उपस्थिता: दृश्यन्ते। प्राचीनकाले या शिक्षा विना धनं सर्वेषां कृते उपलब्धा आसीत्, सैव वर्तमानकाले गणिका इव सञ्जाता। एतेन सहैव शिक्षाया: अभिप्राय: न तु ज्ञानमपितु केवलम् उपाधिपत्रप्राप्ति: एव। अत एव शिक्षिता: भूत्वा अपि वयम् अशिक्षिता: इव आचरणं कुर्म:। वयं प्रतिदिनं पश्याम: यत् शिक्षितै: विद्यार्थिभि: जनै: वा कीदृशम् आचरणं क्रियते? एतया शिक्षया अपि क: लाभ:? यया सर्वत्र असंतोष: अशान्तिश्चैव उत्पद्यते।

एतया वर्तमानशिक्षया कतिपय विषयाणां शिक्षा तु प्राप्यते किन्तु देशं समाजं च प्रति मम किमपि दायित्वमस्ति? देशाय समाजाय च मया किमपि कर्त्तव्यम्? अयं देश: समाजश्च मम अस्ति-इति आत्मीयभावनाया: उत्पत्ति: भवेत् इत्यस्मिन् विषये परिणामशून्यता एव दृश्यते। केवलं पाश्चात्यसंस्कृतेरनुकरणं क्रियते। विचित्रन्तु एतत् यत् तै: तथाकथित-पाश्चात्यै: तु अस्माकम् अनुसरणं न क्रियते, किन्तु वयम् अस्माकं सर्वं परित्यज्य तेषामनुसरणं कुर्म:- एतदेव अस्ति वर्त्तमानशिक्षाया: अवदानम्। कतिपयन् आंग्लशब्दान् पठित्वा, युतकम् उरुकञ्च धृत्वा शिक्षितंमन्यमाना: वयं स्वाभिमानशून्या: भूत्वा अन्धानुकरणं कुर्वन्त: स्म:। कुत्र गता नैतिकता? कुत्र गता चारित्रिकशक्ति:? कुत्र गता प्रामाणिकता? कुत्र गता देशभक्ति:? कुत्र गता आज्ञाकारिता? किं वा अवशिष्टम्? भारतदेशे जन्मप्राप्तवन्त: अस्माभि: किं भारतं पठ्यते? रामकृष्णभरतानां देशे जातानाम् किं रामस्य आज्ञाकारिता, कृष्णस्य अत्याचारिणां कंस सदृशानां वधस्य कथा, भरतस्य भ्रातृप्रेम चेति पठनस्य अधिकार: अस्ति न वा। किम् अस्माकं ऋषिमुनिभि: साधना-तपस्या-परिश्रमेण ये ग्रन्था: (वेदादि) लिखिता:, तान् पठितुम् अन्यग्रहलोकेभ्य: विदेशेभ्यश्च जना: आगमिष्यन्ति? किं तेषां कृत: परिश्रम: एवमेव नष्ट: भविष्यति? किं वयं तेषां वंशजा: न? वयं तु स्वगोत्रनामरूपेणापि तेषामेव नामानि वदाम:, तर्हि किम् अस्माकं पूर्वजा: अस्मान् दृष्ट्वा लज्जिता: न भविष्यन्ति? किम् अस्मान् बोधयितुं पुन: श्रीकृष्णेन गीता-उपदेशा: दातव्या:? नैव, यद् अभूत् तद् अभूत्। इत: परं वयं स्वीयपूर्वजै: प्रदत्तसंस्कृतिं संस्कृतञ्चानुसृत्य प्राचीनशिक्षा-पद्धतिमनुसृत्य भारतदेशं पुनरपि ''विश्वगुरु:'' पदे अलङ्कृतं करिष्याम:। केन्द्रसर्वकारेण राज्यसर्वकारैश्च संस्कृतस्य अध्ययन-अध्यापनाय अनुसंधानाय च पृथक्तया व्यवस्थ: कर्त्तव्या:। संस्कृतभाषाया: मूलभूतज्ञानं सर्वेषां कृते अनिवार्यं भवेत्। प्रतिग्रामं संस्कृतपाठशाला स्थापिता भवेत्। सर्वासु प्रशासनिकपरीक्षासु संस्कृतस्य ज्ञानम् अनिवार्यं भवेत्। वस्तुत: संस्कृतग्रन्थेषु एव सर्वविधसमस्यानां समाधानमस्ति।

संस्कृतस्य सामान्याध्ययनेन सह विशिष्टाध्ययन-व्यवस्थाऽपि भवेत्। तदैव संस्कृतग्रन्थेषु निहितस्य विविध-विषयकज्ञानस्य प्रकाशनं कर्तुं शक्नुम:। मीमांसाशब्दै: शिक्षा सर्वेषां कृते सुलभतया उपलब्धा भवेत्। सर्वेषु देशभक्तै:, कर्त्तव्यपरायणताया:, नैतिकतया:, प्रामाणिकतायाश्च भावना स्वत: एव आगच्छेत्-तथा च ज्ञानदृष्ट्या समृद्धं भूत्वा भारतं - भा+रतम् अर्थात् निरन्तरं भाति इति स्यात्। एतदर्थं वयं स्वीयां शिक्षापद्धतिम् अनुसरेम। भारतं ज्ञातुं संस्कृतं पठाम:।

**सहायक-निदेशक**
राजस्थान-स्टेट-ओपन-स्कूल,
शिक्षा-संकुल:, जयपुरम्

# भूम्यन्तर्जलम्

❑ श्रीमती मीनाक्षी योगी

**भूम्यन्तर्जलम्**- भूमौ अन्तः शिरासु प्रवहमानं जलमेव भूम्यन्तर्गतजलमुच्यते। मरुप्रदेशे भूम्यन्तर्गत-जलस्य शिराः भूमौ अन्तः समदिक्षु शुभाः विनिःसृताः। तत्रैव कोणोत्थाः शिराः अशुभाः निःसृताः। शुभाशुभशिराः स्वदिक्पतिनाम्ना संज्ञिताः। यथा बृहत्संहितायां वराहमिहिराचार्यैरूक्तं यत् ''पूर्वाहूतानलयमनैऋत्य-वरूणपवनेन्दुशंकराः''1 इति विज्ञातव्यम्। पूर्वासां शिराणां क्रमशः देवाः स्व-स्व दिक्पतयः भवन्ति। यतः भूमौ अन्तः भूम्यन्तर्जलस्य शिराः इति संज्ञितम्। यथा आदौ क्रमात् पूर्वा आग्नेयी दक्षिणा नैऋत्या वरुणा वायव्या उत्तरा एशान्या महाशिरा इत्याद्याः नवशिराः इति सुप्रसिद्धम्। एतासां शिराणां देवाः क्रमात् इन्द्रः अग्निदेवः यमः नैऋत्यः वरुणः वायुदेवः चन्द्रः शंकरः महादेवी च इति सुविख्यातम्।

अतः स्वदिक्पतिनाम्ना एव पूरुहूता अनला यमा नैऋत्या वरुणा पवना चन्द्रा शिवा महाशिराश्च नव शिराः जगत् प्रसिद्धाः। **पूर्वा शिरा**-भूमौ अन्तः पूर्वस्यां दिशि विनिसृता शिरा पूर्वा शिरा उच्यते। अस्याः दिक्पतिः इन्द्रदेवः भवति। स्व दिक्पतिनाम्ना पूर्वा शिरा सुप्रसिद्धा। पूर्वा शिरा समदिक्षु संस्थितासु शिरासु अन्यतमा शिरा। समदिक्षु संस्थिताः शिराः शुभाः इति कथितम्। अतः पूर्वा शिरा शुभा। अस्यां पूर्वाशिरायां जलं मधुरम्। लोके अस्याः पूर्वाशिरायाः मधुरं जलं प्रयोगे दृश्यते।

**आग्नेया शिरा**- आग्नेयस्यां दिशि संस्थिता शिरा आग्नेया शिरा कथ्यते। अस्या अधिपति अग्निदेवः भवति। स्वदिक्पतिनाम्ना अनला शिरा सुप्रसिद्धा। आग्नेया शिरा कोणदिगुत्थासु शिरासु अन्यतमा शिरा। कोणदिगुत्था शिरा अशुभा उक्ता। अतः आग्नेया शिरा अशुभा। आग्नेय शिरायाः जलं कषायं भवति। अस्याः शिरायाः जलं प्रयोगे न प्रयुक्तम्।

**दक्षिणा शिरा**-भूमौ अन्तः दक्षिणस्यां दिशि विनिः-सृता शिरा दक्षिणा शिरा उच्यते। अस्याः दिक्पतिः यमदेवः भवति। स्व दिक्पतिनाम्ना यमा शिरा सुप्रसिद्धा। **दक्षिणा शिरा** समदिक्षु संस्थितासु शिरासु अन्यतमा शिरा। समदिक्षु संस्थिताः शिराः शुभाः इति कथितम्। अतः दक्षिणा शिरा शुभा। अस्यां दक्षिणा शिरायां जलं मधुरम्। लोके अस्याः शिरायाः मधुरं जलं प्रयोगे दृश्यते।

**नैऋत्या शिरा**- नैऋत्यस्यां दिशि संस्थिता शिरा नैऋत्या शिरा कथ्यते। अस्या अधिपतिः राक्षसदेवः भवति। स्व दिक्पतिनाम्ना नैऋत्या शिरा इति सुप्रसिद्धम्। नै्ऋत्या शिरा कोणदिगुत्थासु शिरासु अन्यतमा शिरा। कोणदिगुत्था शिरा अशुभा उक्ता। अतः नैऋत्या शिरा अशुभा। नैऋत्या शिरायाः जलं फेनयुक्तम्। अस्याः शिरायाः फेनयुतं जलं प्रयोगे न प्रयुक्तम्।

**पश्चिमा शिरा** - भूमौ अन्तः पश्चिमस्यां दिशि विनिःसृता शिरा पश्चिमा शिरा उच्यते। अस्याः दिक्पतिः वरुणदेवः भवति। स्व दिक्पतिनाम्ना वरुणा शिरा सुप्रसिद्धा। पश्चिम शिरा समदिक्षु संस्थितासु शिरासु अन्यतमा शिरा। समदिक्षु संस्थिताः शिराः शुभाः इति कथितम्। अतः पश्चिमा शिरा शुभा। अस्यां पश्चिमाशिरायां जलं शुद्धम्। लोके अस्याः शिरायाः मधुरं शुद्धं जलं प्रयोगे प्रयुज्यते।

**वायव्या शिरा**- वायव्यस्यां दिशि संस्थिता शिरा वायव्या शिरा कथ्यते। अस्या अधिपतिः पवनदेवः भवति। स्व दिक्पतिनाम्ना पवना शिरा इति सुप्रसिद्धम्। वायव्या शिरा कोणदिगुत्थासु शिरासु अन्यतमा शिरा। कोणदिगोत्था शिरा अशुभा उक्ता। अतः वायव्या शिरा अशुभा । वायव्या शिरायाः जलं लवणयुक्तम्। अस्याः शिरायाः जलं लवणं पीतवर्णयुतं प्रयोगे न प्रयुक्तम्।

**उत्तरा शिरा** - भूमौ अन्तः उत्तरस्यां दिशि विनिःसृता शिरा उत्तरा शिरा उच्यते। अस्याः दिक्पतिः चन्द्रदेवः भवति। स्वदिक्पतिनाम्ना चन्द्रा सौम्या शिरा नाम्ना सुप्रसिद्धा। उत्तरा शिरा समदिक्षु संस्थितासु शिरासु अन्यतमा शिरा। समदिक्षु संस्थिताः शिराः शुभाः इति कथितम्। अतः उत्तरा शिरा शुभा। अस्यां उत्तराशिरायां जलं मधुरम्। लोके कौबेरी शिरा नाम्ना अपि प्रसिद्धम्। अस्याः शिरायाः मधुरं जलं प्रयोगे दृश्यते।


**ऐशानी शिरा**- एशान्यां दिशि संस्थिता शिरा ऐशानी शिरा कथ्यते। अस्या अधिपतिः शंकरः भवति। स्व दिक्पतिनाम्ना शंकरा शिरा इति सुप्रसिद्धम्। ऐशानी शिरा कोणदिगुत्थासु शिरासु अन्यतमा शिरा। कोणदिगुत्था शिराः तु शुभा इति उक्तम्। किन्तु एशान्या शिरा शुभा। ऐशान्या शिरायाः जलं शर्करा युक्तम्। लोके माहेन्द्री शिरा नाम्ना अपि प्रसिद्धा। अस्याः शिरायाः जलं मधुरं प्रयोगे प्रयुक्तम्।

**महा शिरा**- भूमौ अन्तः संस्थासु मध्ये नवमी शिरा महा शिरा उच्यते। अस्यां शुद्धं जलं सर्वासु शिरासु प्रोन्नतनिम्नौच्चसंस्थासु प्रवह्य समाविश्य प्रवहति। अस्यां जलं दीर्घ कालं स्थास्यति। अस्याः शिरायाः देवी भूदेवी वर्तते। एषा महा शिरा शुभा इत्यभिधीयते।

एवं भूमौ अन्तः पूर्वस्यां दिशि पूर्वाः शिराः, आग्नेयायां दिशि आग्नेयाः शिराः, दक्षिणस्यां दिशि दक्षिणाः शिराः, नैऋत्यां दिशि नैऋत्याः शिराः, पश्चिमायां दिशि पश्चिमाः शिराः वायव्यां दिशि वायव्याः शिराः, उत्तरस्यां दिशि उत्तराः शिराः, ऐशान्यां दिशि ऐशान्याः शिराश्च विनिःसृत्य प्रवहन्ति। अतः वराहमिहिराचार्यानुगुणं भूमौ प्रवहमानानां शिराणां एतासां संस्थापनं वृत्ते पूर्वादिदिशासु अष्टसु दिक्षु संस्थाप्यते। वृत्ते च दिक्देवानामाधारेण अष्टसु दिक्षु ऐन्द्रादिदेवाश्च स्थाप्यन्ते। दिशानां उपरि चक्रे जलस्य षड् रसं च संस्थाप्य भूम्यन्तर्जलचक्रयन्त्रं नूतनं लिखितम्। भूम्यन्तर्जलचक्रे भूमौ अन्तः प्रवहमानजलस्य शिरा अति शीघ्रं समुपलभ्यते। अस्य साहाय्येन भूम्यन्तर्गतजलस्य शिरा सश्च शीघ्रं भूमौ उपरि एव अन्वेष्टुं शक्यते। अस्मिन् चक्रे भूम्यन्तर्गतजलस्य दिशा शिरा रसं च अन्वेषणेन शीघ्रं लभ्यते। अतः वराहमिहिराचार्यानुगुणं भूम्यन्तर्जल-चक्रयन्त्रम् भूमौ विद्यमानानां शिराणां नूतनं विलिखितम्। राजस्थानसदृशे जलाभाव-स्थाने शुष्कक्षेत्रेषु इदं स्पष्टं भूम्यन्तर्जलचक्र-यन्त्रं परमम् आवश्यकम्। अस्य साहाय्येन भूम्यन्तर्जल-

वृत्तखनने अनावश्यक लक्षात्मक व्ययो न जायते।

**भूम्यन्तर्जलचक्रयन्त्रम्**




| | |
|---|---|
| द.शि = दक्षिणा शिरा | क.ज. = कषाय जलम् |
| नै.शि.= नैऋत्य शिरा | क्षा.ज.= क्षारं जलम् |
| प.शि.= पश्चिमा शिरा | फेज़ = फेनं जलम् |
| वा.शि. = वायव्या शिरा | ति.ज.= तिक्तं जलम् |
| उ.शि. = उत्तरा शिरा | आ.ज.= आम्रं जलम् |
| एशि. = ऐशान्या शिरा | क्षि.ज.= क्षीरं जलम् |
| म.शि. = महा शिरा | मि.ज.= मिष्टं जलम् |
| शु.शि. = शुभा शिरा | स.ज.= सकरा जलम् |
| | अ.शि.= अशुभा शिरा |

बृहत्संहितायाम् अन्नमाधारो जगतः प्राणाः इत्युक्तम्। तस्मात् कारणात् वृष्टिकालः (प्रावृट् कालः)। तं कालं वर्षणप्रवर्षणकालं दैवदिविहित-चित्तैभ्यःर्निशं निरीक्षितम् वदन्ति। तत्र ज्योतिर्विद्भिः गर्गपाराशरकाश्यपादिभिः वर्षणं कालं तत्तल्लक्षणानि रचितानि। गर्गादीनां मतं यन् मेघाः सार्द्ध षड् मास पूर्वमेव समुद्भवन्ति। समुद्भूताः जलांशाः सावनमानेन मेघेषु गुरुत्वं प्राप्य 195 दिवसेषु बिन्द्वेकमेकं वर्षन्ति। ततः भूम्यन्तर्गतजल-चक्रस्य कालद्वये प्रथमं ग्रहराशिनक्षत्रजलसरञ्चनचक्रं द्वितीयं वृष्टिः आधारद्वयं इति कथितम्। प्रथमे प्रथमे ग्रहराशिनक्षत्रजलचक्रे उपद्रवरहिते कालेषु भूम्यन्तर्जलस्य जलांशाः निमिषं निमिषं समुद्भूताः भवन्ति। तादृशं समुत्पन्नाः सूक्ष्माति-सूक्ष्माः जलांशाः बिन्द्वेकमेकं प्रतिदिनं प्रतिनिमिषं ग्रहराशिनक्षत्रचक्रे उपद्रवरहित कालेषु तृणाग्रे दृश्यन्ते। तत्र केचन असितपक्षोत्पन्नाः जलांशाः शुक्ले वर्षन्ति। केचन सितपक्षोत्पन्नाः असिते पक्षे अभिवर्षन्ति। यथा वराहमतमिदं कृष्णपक्षोभ्द्भवाः मेघाः शुक्लपक्षे वर्षन्ति। शुक्लपक्षोद्भवाः मेघाः कृष्णपक्षे अभिवर्षन्ति। गर्गमतमिदं पौर्णमास्यां समुद्भवाः मेघा अमावस्यां, अमावस्यां मेघाः समुद्भवाः पौर्णमास्यां वर्षन्ति। पूर्वस्यां संन्ध्यायां समुद्भवाः मेघाः पश्चिमायां वर्षन्ति। पश्चिमस्यां समुद्भवाः मेघाः पूर्वस्याम् अभिवर्षन्ति। दिनस्य पूर्वार्धे समुद्भवाः मेघाः पश्चात् रात्रौ, पश्चात् रात्रौ समुद्भवाः मेघाः दिनस्य पूर्वार्धे वर्षन्ति। निशायां समुद्भवाः मेघाः पूर्वाह्ने, पूर्वाह्ने समुद्भवाः मेघाः निशायां अभिवर्षन्ति। मेघेषु गुरुत्वं प्राप्य 195 दिवसेषु वर्षणकालेषु प्रवर्षन्ति। प्रवर्षणकाले वर्षितं जलं भूमौ समाविश्य भूम्यन्तर्जलमुच्यते। एतादृशेषु वृष्टियोगेषु वर्षितं जलं भूमौ प्रौन्नतनिम्नौच्चसंस्थासु समाविश्य अष्टदिङ्शिरासु प्रविश्य महाशिरासु प्रवहति। अतः शोधे अस्मिन् भूमिगतजलस्य कारकद्वयं विभक्तं सुप्रसिद्धम्।

**शोधच्छात्रा**
**ज.रा.रा.सं.वि.वि., जयपुरम्**

नारी-स्तम्भः

# ब्रह्माऽपि तं न रक्षति

❑ डॉ. राजेश्वरीभट्ट

मातृवत् परदारेषु इत्यस्मिन् अल्पाक्षरगुम्फिते पदसमूहात्मके वाक्ये भारतीयसंस्कृतेरनुपमं वैशिष्ट्यं नारीणां विराट्स्वरूपञ्च उद्घाटितम्। देशोऽयं नारीपूजको वर्तते। अत्र सर्वत्र परनारी मातृवत् पूज्यते। सा गृहस्य समाजस्य राष्ट्रस्य प्रतिष्ठा वर्तते। नारीणां अवमानो महत्पापं सम्मानश्च परमपुण्यात्मको भवति। पावनीयं परम्परा युगयुगेभ्यो विश्वस्मिन् विश्वे नारीणां गौरवं वर्द्धयति। शास्त्रेभ्यो ज्ञायते यत् लंकाधिपति-रावण-दुष्टदुःशासनकामीकीचक-सदृशानां दुराचारिणां विनाशो नारीणां अवमानेनैवाभवत्। नारीभिः सह आचरितस्य स्वल्पस्यापि दुष्कर्मणो निष्कृतिर्नास्ति। सर्वथा जितेन्द्रियस्य आजीवनं ब्रह्मचर्यव्रतधारिणः पितामहभीष्मस्य काशिराज पुत्र्याऽम्बया सह आचरितः स्वल्पोऽपि प्रमादोदण्डं विना कथमपि मुक्तो न भवति। अस्मिन् प्रसङ्गे रामायणे वर्णितमिदं वृत्तमुल्लेखनीयमस्ति। ज्ञायते यत् अशोकवाटिकायां निवसत्या सीतादेव्या सह कामपीड़ितो रावणः सर्वथा उत्कण्ठितोऽपि तथा उपभोगं कर्त्तुं समर्थो नाऽभवत्। तत्र तस्य सदाशयता कारणं नासीत् नैव रावणस्य मनसि सीतां प्रति मनागपि करुणा भावोऽवर्ततापितु पूर्वजन्मनि कृतेन नार्यमपमानेनाऽभिशप्तो रावणः आत्मनोऽभीष्टं पूरयितुं सर्वथाऽसमर्थोऽ भवत्। वाल्मीकीयरामायणे स्वापराधं स्वीकुर्वन् रावणों महापार्श्वं ब्रवीति-एकदा मया आकाशे अग्नि-शिखेव देदीप्यमाना पुञ्जिकस्थला नाम्नी अप्सरा दृष्टा। मां दृष्ट्वा मद् भयाद्भीता सा पितामहस्य भवनं प्रति अग्रेसरा जाता। किन्तु मार्गमध्ये कामपीड़ितेन मया पुञ्जिकस्थला विवसना कृता तया सह दुर्वृत्तञ्च चरितम्। मया उपभुक्ता पुञ्जिकस्थला। म्लाना कमलिनीव यथाकथञ्चित् ब्रह्मणो भवनं प्राप्ता। कथितञ्च-

पितामहस्य भवनं गच्छन्तीं पुञ्जिकस्थलाम्।
चञ्चूर्यमाणामद्राक्षमाकाशेऽग्निशिखामिव।।
सा प्रसह्य मया भुक्ता कृता विवसना ततः,
स्वयम्भूभवने प्राप्ता लोलिता नलिनी यथा

वा.रा. युद्धकाण्ड 11-12

पुञ्जिकस्थलाया दुर्गतिं दृष्ट्वा, ब्रह्मा योगबलेन मयाऽऽचरितस्य दुष्टकर्मणो विषये सर्वं ज्ञातवान् मयाऽऽचरितेन कुकर्मणा कुपितो वेधा मामबवीत् यदद्यप्रभृति यदि त्वं परनार्या सह दुष्कर्मणि प्रवृत्तो भविष्यसि तर्हि तत्क्षणमेव तव मूर्धा शतधा विदीर्णो भविष्यति।

कथितञ्च -

अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि?
तदा ते शतधा मूर्धा फलिष्यति न संशयः।।

वा.रा. युद्धकाण्ड 13, 14

स्पष्टमस्ति यत् नारीपीडकस्य कुत्रापि कथमपि निष्कृतिर्नास्ति। तथापि दिने दिने नारीशोषकाणां पीड़कानाञ्च संख्या वर्द्धमाना दृश्यते। मार्गेषु, वाहनेषु, महाविद्यालयेषु, कार्यस्थलेषु, किमधिकं

**धर्मस्थलेष्वपि गच्छन्तीनामागच्छन्तीनां च नारीणां कृते आत्मसुरक्षा कठिनतरा जाता। समाज-कण्टकानां दुष्प्रवृत्तिभिः नार्य आत्मनोऽसुरक्षिता अनुभवन्ति। मातृदेवो भव इति परम्परायां पोषिते समाजे नारीपीडनं निन्दनीयतरं वर्ततें तच्च सर्वथा निरोद्धव्यमिति भावनीयम्।**

### हिन्दी अनुवाद

**'मातृवत् परदारेषु'** परस्त्री के साथ माता के समान शिष्ट व्यवहार करो। इस वाक्य में भारतीय संस्कृति का अनुपम वैशिष्ट्य एवं नारियों के विराट स्वरूप को उद्घाटित किया गया है। भारतवर्ष नारीपूजक देश है। यहाँ नारी माता के समान सम्माननीया है वह घर-समाज एवं राष्ट्र की प्रतिष्ठा है। यहाँ नारियों का अपमान घोर पाप एवं सम्मान पुण्य कारक है। यह पावनी परम्परा युग युग से विश्व में भारत का एवं नारी का गौरव बढ़ा रही है। शास्त्रों से ज्ञात होता है कि लंकाधिपति रावण-दुष्ट दु:शासन कामी कीचक जैसे दुराचारियों का विनाश नारी के अपमान से ही हुआ है। नारियों के साथ किए गए थोड़े से भी अपराध से मनुष्य का छुटकारा सम्भव नहीं है। सर्वथा जितेन्द्रिय, आजीवन ब्रह्मचर्य व्रत का पालन करने वाले भीष्मपितामह का काशिराज की पुत्री अम्बा के साथ किया हुआ थोड़ा सा भी प्रमाद पितामह के गले का फंदा बन गया जिससे उनका जीवन भर छुटकारा नहीं हुआ। नारी पीड़क अपने अपराध का दण्ड भोगे बिना मुक्त नहीं हो सकता। इस प्रसंग में रामायण में वर्णित यह प्रसंग उल्लेखनीय है। ज्ञातव्य है कि अशोक वाटिका में निवास करती हुई भगवती सीता के साथ काम पीड़ित रावण अत्यन्त उत्कंठित होने पर भी कामोपभोग करने में समर्थ नहीं हो सका इसका कारण रावण की सज्जनता अथवा करुणा नहीं अपितु पूर्वजन्म से नारी के साथ किया हुआ दुर्व्यवहार था जिससे अभिशप्त रावण अपने मनोरथ को पूर्ण करने में सर्वथा असमर्थ था। वाल्मीकि रामायण में अपने अपराध को स्वीकार करते हुए लंकाधिपति रावण महापार्श्व से कह रहे है- एक दिन मैंने आकाश में अग्निशिखा के समान देदीप्यमान पुञ्जिकस्थला नाम की अप्सरा देखी। मुझ को देखकर भयभीत होकर वह ब्रह्मा के भवन कीओर आगे बढ़ी किन्तु मार्ग के बीच में मैंने काम से पीड़ित होकर उसे विवसना कर दिया एवं उसके साथ दुराचरण किया। मेरे दुराचरण से सताई हुई पुञ्जिकस्थला मसली हुई मुर्झाई कमलिनी की भाँति दशा से किसी तरह ब्रह्मा जी के भवन में पहुँच गई। पुञ्जिकस्थला की दुर्गति देखकर ब्रह्मा जी ने अपने योग बल से मेरे द्वारा किए हुए दुष्कर्म के विषय में सब कुछ जान लिया और कहा आज से यदि तुम किसी पराई स्त्री के साथ दुष्कर्म में प्रवृत्त होवोगे तो तुम्हारे सिर के सौ टुकड़े हो जाएँगे। इससे स्पष्ट है कि नारीपीड़क का कभी छुटकारा नहीं हो सकता। इस तथ्य को जानने पर भी दिनों दिन नारी शोषकों एवं पीड़कों की संख्या बढ़ती जा रही है। मार्गों में, वाहनों में, शिक्षालयों में, कार्यालयों में यहाँ तक कि धर्मक्षेत्रों में भी आने जाने वाली नारियों के लिए अपनी सुरक्षा अत्यन्त कठिन होती जा रही है। समाजकण्टकों की दुष्प्रवृतियों से आज नारी अपने को असुरक्षित अनुभव कर रही है। **'मातृदेवो भव'** इस पावनी परम्परा से पोषित समाज में नारी का शोषण अत्यन्त निन्दनीय है, उसे सर्वथा रोकना चाहिए।

**सी/276ए, भाभामार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# सेवनीया घृतकुमारिका

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः



**व्यवस्थितरूपेण सेव्यमानानि कानिचिद् द्रव्याणि सर्वदा हितकारकारिण भवन्ति। एकस्मिन् सथले चरकाचार्यः निर्दिशति, यत्-**

**षष्टिकान् शालिमुद्गांश्च सैन्धषमलके यवान्।**
**आन्तरीक्षं पय सर्पिर्जाङ्गलं मधुचाम्यसेत्।।**

**( च.सू. 5/12 )**

**आचार्योऽत्र कानिचिदभ्यस्यानि द्रव्याणि संकेतयति। यतो हि पृथिव्यां बहूनि द्रव्याण्येता-दृग्विधानि सन्ति येषां व्यवस्थित रूपेण निरन्तराभ्यासथपूर्वकं सेवनेनापि शरीरे काचिद्धानिर्न भवत्यपि तु शारीरधातूनामभिवर्द्धनं साम्यापादनञ्च भवति। अत एव तानि द्रव्याणि त्वभ्यस्यानि भवन्ति। अभ्यासयोग्यष्वेतादृग्विधेषु द्रव्येषु त्वेका घृतकुमारिका भवति। किन्त्वत्रापवा-दोऽपि वर्तते, यतो हि सर्वदा मात्रया सेव्यमानाप्येषा न तु सर्वेषु जनेषु हितकारिका भवति।**

व्यवस्थित रूप से सेवन करने योग्य कुछ द्रव्य सदा ही हितकारी होते हैं। एक स्थल पर आचार्य चरक निर्देश करते हैं कि-

साठी चावल, शालि चावल, मूंग, सैन्धव नमक, जौ और अन्तरिक्ष का जल, दूध, घी, जङ्गली पशुओं का मांस और मधु का अभ्यासपूर्वक सेवन करना चाहिए।

आचार्य यहाँ पर कुछ अभ्यास करने योग्य द्रव्यों को संकेतिक करते हैं। क्योंकि पृथ्वी पर बहुत से द्रव्य इस प्रकार के हैं जिनके व्यवस्थित रूप से निरन्तर अभ्यासपूर्वक सेवन से शरीर में कोई हानि नहीं है अपितु शरीर के धातुओं की अभिवृद्धि और साम्यावस्था में होना होता है। इसलिए वे द्रव्य अभ्यास करने योग्य होते हैं। इस तरह के अभ्यास योग्य द्रव्यों में तो एक घृतकुमारी (ग्वारपाठा) भी है जो कि सेवन की जाती हुई सदा हितकारी होती है। किन्तु इसमें अपवाद भी है, क्योंकि सदा मात्रापूर्वक सेवन की जग्ती हुई भी सब लोगों में हितकारी नहीं होती है।

**श्रेष्ठा ह्येषा घृतकुमारिका भेदनी शीता तिक्ता नेत्र्या रसायनी च भवति, किञ्चिन्यधुरा घृतकुमारिका बृंहणी बल्या वृष्या वातविषप्रणु द्धवति तथा गुल्मप्लीहयकृद्रोगान्नाशयति। कफज्वरहरीत्वेषा बाह्यप्रयोगेण त्वगामयान् हन्ति, अग्निदग्धे त्वस्याः लेपो दाहनिवारको भवति। रक्तविकृत्तै पित्तजनिते च दाहे विस्फोटेष्वप्यस्याः संस्पर्शे हिताव हो भवति। वातानुलोमनी घृतकुमारिका रजः कृच्छ्रे हितकारिणी भवति। अस्याः प्रयोगेण सम्यगार्तवप्रवृत्तिर्भवत्यत एव रक्तप्रदरे सगर्भायाञ्चास्याः प्रयोगो न करणीयः। मलनिः सारिका ह्येषा कोष्ठबद्धे विशेषेण प्रयोज्या वर्तते।**

श्रेष्ठ यह घृतकुमारी (ग्वारपाठा) मल को तोड़ने वाली (दस्त लगाने वाली), शीतल, तिक्त (कडुए) रसवाली, नेत्रों के लिए हितकार और रसायन गुणवाली होती है। कुछ मधुर रसयुक्त यह घृतकुमारी बृंहण (मोटा) करने वाली, बल देने वाली, वृष्य (मैथुन शक्ति बढाने वाली), वात और विष के प्रभाव को नष्ट करने वाली होती है तथा गुल्म, प्लीह रोग और सकृद् रोग को नष्ट करती है। कफज्वर का हरण करने वाली तो यह बाह्य प्रयोग से त्वचा के रोगों को नष्ट करती है। अग्निदग्ध में तो इसका लेप दाह (जलन) को दूर करने वाला होता है।

रक्तविकृति में और पित्तजनित दाह में और विस्फोटों (फोडे-फफोलों) में भी इसका स्पर्श (लेप आदि के माध्यम से होने वाला स्पर्श) हितकारी होती है। बात का अनुलोमन करने वाली घृतकुमारी रजः कृच्छ (कष्टावर्तव, मासिक धर्म के रूकावट) में हितकारी होती है इसके प्रयोग से आवर्तत (मासिक धर्म) की प्रवृत्ति ठीक तरह से होती है इसलिए रक्तप्रदर रोग में और गर्भिषी से इसका प्रयोग नहीं करना चाहिए। मल को बाहर निकालने वाली यह कोष्ठबद्ध (विबन्ध, कब्जी) में विशेष रूप से प्रयोग करने योग्य है।

**हिन्दीभाषायां 'ग्वारपाठा' नाम्ना तथा आंग्लभाषायाम् एलोवीरां नाम्ना प्रसिद्धा ह्येषा संस्कृते कुमारी गृहकन्या कन्या घृतकुमारिकेति चतुर्भिर्नामभिः प्रसिद्धा वर्तते। बहुविधाप्येषा सामान्यतया द्विविधरूपेण जनैरवलोक्यते-मधुरा तिक्ता च। गुणेषु तु तिक्तैव श्रेष्ठा भवति, सा हि विशेषेण रेचनी भवति। मूलरूपेण तु न ह्येषः क्षुपो भारतीयो वर्तते। प्राथमिकरूपेणास्योत्पत्तिस्थानं 'स्पेन-देशः' उत्तरी अफ्रीका-देशश्च वर्तेते। कदा ह्यस्यागमनं भारतदेशे जातः इति तु विद्वद्भिरिति-हासेऽन्वेषणीयो वर्तते। किन्त्विति तु सुस्पष्टं वर्तते यद् वर्तमानकालेऽस्य द्रव्यस्योपलब्धिःप्राया सम्पूर्णे भारतवर्षे। अतिशीतं प्रदेशं निवर्ज्य वर्तते। अल्पजलाभिकांक्षिण्याः गृहकन्यायाः समुत्पत्रि-र्विशेषेण मरुभूमौ भवति।**

हिन्दी भाषा में 'ग्वारपाठा' नाम से तथा अंगेजी में 'एलोवीरा' नाम से प्रसिद्ध यह संस्कृत में कुमारी, गृहकन्या, कन्या और घृतकुमारिका इन चार नामों से प्रसिद्ध है। अनेक प्रकार की होने वाली भी यह सामान्यतया लोगों के द्वारा दो तरह की देखी जाती है-मीठी और कड़वी। गुणों में तो कड़वी ही श्रेष्ठ होती है। वह विशेष रूप से रेचनी (दस्त लगाने वाली) होती है। मूलरूप से तो यह क्षुप (पौधा) भारतीय नहीं है। प्राथमिक रूप से इसका उत्पत्ति स्थान स्पेन देश और उत्तरी अफ्रीका है। इसका आगमन भारत देश में कब हुआ, यह तो विद्वानों के द्वारा इतिहास में खोजने योग्य है। लेकिन यह तो अत्यन्त स्पष्ट है कि वर्तमानकाल में इस द्रव्य की उपलब्धि प्रायः सम्पूर्ण भारतवर्ष में (अत्यन्तशीत प्रदेश को छोड़कर) है। थोड़े से जल की आवश्यकता (इच्छा) वाली गृहकन्या (ग्वारपाठा) की उत्पत्ति विशेष रूप से मरुभूमि में होती है।

**अस्याः प्रयोगः सर्वदाऽऽर्द्रावस्थामेव भवति। अस्याः स्वरसा यदा विशिष्टेन विधिना संशुष्कः क्रियते तदा संशुष्कस्यास्य द्रव्यस्य नाम 'मुशब्बर' इति प्रसिद्धं भवति। न्यूनमात्रायां प्रयोज्येऽस्मिन् द्रव्ये रेचकता रजः प्रवर्तकता च विशेषेण भवति। न च सर्वैः प्रयोज्यमिदं 'मुशव्वर' नामकं द्रव्यम्। केवलं चिकत्सकैरेवावधानतया प्रयोज्यमिदम्। ग्वारपाठा नाम्ना प्रसिद्धायाः गृहकन्यायाः वर्तते। निरापद-श्चास्याः प्रयोगः। अत्र केषाञ्चित् प्रयोगाणामुल्लेखः, क्रियते। शीतवीर्यात्मिकाया अप्यस्याः प्रयोगो वर्षर्तौ हेमन्ते शिशिरे च विशेषरूपेण करणीयो वर्तते।**

इसका प्रयोग सदा आर्द्रावस्था (ताजा स्थिति) में ही होती है। इसका स्वरस जब विशिष्ट विधि से सुखाया जाता है तब सूखे हुए इस द्रव्य का नाम 'मुशव्वर' यह होता है। अल्प मात्रा में प्रयोग रने योग्य इस द्रव्य में रेचकता (दस्तलगाने का गुण) और मासिक धर्म प्रवृत्त कराने का गुण विशेष रूप से होता है। यह मुशव्वर नाम का द्रव्य सब के द्वारा प्रयोग करने योग्य नहीं है। केवल चिकित्सकों के द्वारा ही यह सावधानी से प्रयोग करने योग्य है। 'ग्वारपाठा' नाम से प्रसिद्ध गृहकन्या का प्रयोग तो सामान्य रूप सब के द्वारा करणीय है। इसका प्रयोग निरापद है। (कोई हानि नहीं होती)। यहाँ कुछ प्रयोगों का उल्लेख किया जा रहा है। शीतवीर्य वाली भी इसका प्रयोग वर्षा ऋतु में, हेमन्त में और शिशिर में विशेष रूप से करने योग्य है।

**मज्जप्रयोग :-**

**घृतकुमारिकायाः स्वरूपं पूर्णरूपेण मत्रात्मकमेव भवति। सम्पूर्णे क्षुपे केवलानि पत्राण्येव भवति (यानि पाठा इति कथ्यन्ते) सुपुष्टानि पत्राणि मज्जात्मकानि भवन्ति। सुपुष्टमेकं पत्रं क्षुपात् पृथक् कृत्वा गृह्णीयात्, केवलमर्धमेव पत्रंमेकवारं प्रयोज्यं वर्तते। सम्पूर्णस्यापि पत्रस्य प्रयोगो निरापदो भवति, पुनरपि सामान्येनार्धस्यैन पत्रस्या भक्षणं करणीयम्। भक्षणक्रमे तु सावधानतया छुरिकयोपरित्वचायाः निर्हरणं करणीयम्, पूर्वं तु कटकाकीर्णस्य पार्श्वभागस्यापा-करणमावश्यकम्, पश्चाच्च मज्जायाः पृथक्करण-मावश्यकम्। पृथक्कृताया अस्याः मज्जयाः भक्षणं करणीयम्। प्रातःकाले निराहारे त्वस्याः प्रयोगोऽधिक श्रेष्ठो वर्तते।**

**स्वरसस्य प्रयोगः -**

**इमां मज्जां सम्यग् विमर्द्य स्वरसनिर्माणं विधेयम्। स्वरसस्यास्य प्रयोगोऽनेनैव विधिना प्रातःकाले करणीयः। वर्तमानकाले व्यावसायिक-रूपेणायणेऽस्याः स्वरसो मिलति, तस्य प्रयोगोऽपि समुचितः, पुनरपि सद्योगृहीतस्य स्वरसस्यैव प्रयोगोऽधिकः श्रेयस्करो वर्तते।**

**शाकात्मके व्यञ्जनरूपे प्रयोगः-**

**उपर्युक्तेन विधिना पृथक्कृताभिः मज्जाभिः व्यञ्जनात्मकस्य शाकस्य निर्माणं सामान्यविधिना करणीयम्। यत्र हि स्नेहस्य (घृतस्य तैलस्यवा), रक्तमरिचस्य, हरिद्रायाः, धान्यकस्य श्रवणस्य च यथामात्रं प्रक्षेपः करणीयः याककाल एव दधिमिश्रणं तथा हिंगुप्रक्षेपापि समुचितम्। अस्य भक्ष्णणं यथेच्छे मप्यापद् रहितम्।**

**अन्येषामपि केषाञ्चित्प्रयोगाणामुलेरवमग्रिमे लेखे करिष्यामि।**

**गूदे का प्रयोग -**

ग्वारपाठे का स्वरूप पूर्ण रूप से पत्र वाला ही होता है सम्पूर्ण क्षुप में केवल पत्रे ही होते हैं (जिन्हें पाठा बोलते हैं)। सुपुष्ट पत्र (पाठे) गूदे वाले होते हैं। सुपुष्ट एक पाठे को क्षेप से अलग करके लेना चाहिए, एक बार में केवल आधा पाठा ही प्रयुक्त करना चाहिए। पूरे पाठे का भी प्रेयाग निरापद ही होता है। फिर भी सामान्य रूप से आधो पाठे को ही खाना चाहिए। खाने के क्रम में चाकू से सावधानीपूर्वक ऊपर के छिलके को हटा देना चाहिए, इससे भी पहले काँटे युक्त पार्श्व के भाग को हटाना आवश्यक है। बाद में गूदे को आवश्यक रूप से अलग कर लेना चाहिए। अलग किए हुए इस गूदे को खाना चाहिए। प्रात:काल भूखे पेट ही इसका प्रयोग किया जाय तो अधिक श्रेष्ठ होता है।

**स्वरस का प्रयोग -**

इस गूदे को अच्छी तरह मसल कर स्वरस बना लेना चाहिए (मिक्सी में पीसा जा सकता है)। इस स्वरस का प्रयोग इसी विधि से प्रातःकाल करना चाहिए। वर्तमान काल में बाजार में व्यावसायिक रूप से इसका स्वरस मिलता है, उसका प्रयोग भी उपयुक्त है, फिर भी सद्योगृहीत (ताजा) स्वरस का ही प्रयोग अधिक श्रेष्ठ होता है।

**शाक (सब्जी) व्यञ्जन के रूप में प्रयोग -**

उपयुक्त विधि से अलग किए गए गूदे से व्यञ्जन-स्वरूपक शाक का निर्माण सामान्य विधि से करना चाहिए। जिसमें स्नेह को (घी का या तेल को), लाल मिर्च को, हल्दी को, धनिया को और नमक को उपयुक्त मात्रा के अनुसार डालना चाहिए। पकते समय ही इसमें दही तथा हींग को डालना भी उपयुक्त रहता है। इसका भक्षण इच्छानुसार पर्याप्तमात्रा में खाना भी निरापद होता है।

और भी कुछ अन्य प्रयोगों को उल्लेख अग्रिन लेख में करूँगा।

**४०, सेनापति हाऊस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**
**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,